स्तुतिसूक्तिमालाव्याख्या
तात्पर्यप्रकाशिकाख्या

५२ पत्राणि

२९७ २२०

काव्ये वेदांत
१४००

स्तुतिसूक्तिमालाव्याख्या तात्पर्यप्रकाशिका

श्रीगणेशायनमः। इहखलुकलिकालकलनानन्तरमवैदिकबौद्धादिराद्धांतानुसंधानवि
धौविप्लुतधीभिर्विश्वनिरीश्वरत्वनिर्वाहिकवैदिकापसदमीमांसककल्पितानल्पविकल्पश्रयणो
न्मिषितकल्मषकलुषितधृषांकविषयशेमुषीकान्मनीषिणोनुग्रहीतुकामोमहेश्वरांशावतारायमा
णःपदवाक्यप्रमाणज्ञोहरदत्ताचार्यःशैववैदिकत्वविश्वासकारिणीमवैदिकमतमतिनिरा
सकारिणींसमस्तकल्मषापहारिणीमशेषपुरुषार्थपूरिणींसंसारसागरोत्तारिणींसर्वेकेल
क्तिविलवविस्तारिणींपंचाशदुत्तरशतश्लोकात्मिकामीश्वरस्यस्तुतिसूक्तिमालांचिकीर्षु
र्लक्षणप्रमाणाभ्यांहिवस्तुसिध्यतीतिन्यायेनतत्सिद्ध्यर्थमस्यांस्तुतिसूक्तिमालायांप्राधान्येनप्र
तिपिपादयिषितानिनमःशेषित्वनिरतिशयैश्वर्यादिगुणकत्वनारायणोपनिषदुदीरितोपास्य
त्वगायत्रीप्रतिपाद्यत्वक्रतुशेषित्वरूपाणिपंचलक्षणानिसंगृह्णानःस्वाद्धिशिष्टत्वेनानन्यसा राम
धारणत्वाद्धस्यैवाश्रयणीयत्वमाह। यस्मैनमइति। नमोनमस्कारःयस्मैयस्यसंबंधीभवति। २

नमस्कारक्रियायामस्यैवास्ति प्रेतत्वान्नमसस्तत्संबंधित्वं॰ यस्मै नमस्तस्मै त्वाहुष्टं निपुनञ्मी
तिमंत्रानुकरणार्थत्वाद्नुकार्यानुकरणयोरभेदविवक्षयायस्माइति चतुर्थी॰ अनेन नमःशोषित्वं
लक्षणमुक्तं॰ समग्राः सकला गुणा ऐश्वर्यादयो यस्य संबंधिनः अनेनैश्वर्यादिगुणकत्वं लक्षण
मुक्तं॰ नारायणोपनिषदा॰ उपसमीपे ईश्वरप्रतिपादकत्वेन निषीदतीत्युपनिषद्वेदशिरोभागः उपनि
षद्वल्लिदेःसतरद्विषेत्यादिनाक्षिप्तसादेरप्रतेरिति निबद्धत्वं॰ नारायणेन महर्षिणा दृष्टा उपनिष
न्नारायणोपनिषत्तया यस्योपासनोक्ता अनेन नारायणोपनिषदुदीरितोपास्यत्वं लक्षण
मुक्तं॰ यईश्वरो नोस्माकं बुद्धिं धर्माधर्मादिगोचरां प्रचोदयति प्रेरयति॰ अनेन गायत्रीप्रति
पाद्यत्वं लक्षणमतिप्रेतं॰ ऋतोऽधि॰ ऋतोरीश्वरः अधिरीश्वरइत्यधिशब्दस्य कर्मप्रवचनी
यसंज्ञायां॰ यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमीति क्रतुशब्दात्सप्तमी उत्र ऋतेरीश्वरश
ब्दोत्र प्रधानः यस्य स्वामिन ईश्वरत्वमुच्यते तेन स्मात्स्वामिनः सप्तमीत्येकः यस्य स्वस्यैश्व

रुच्यते तस्मात्सप्तमी स्वपरः तत्र यदा त्वाम्यर्थव्यतिरेकविवक्षा तदा तत्र सप्तमी॰ यदा स्वस्य व्यति
रेकविवक्षा तदा ततः सप्तमी॰ अत्र स्वार्थविशेषे क्रतुशब्दात्सप्तमी॰ अनेन क्रतुशेषित्वं लक्षणादु
क्तं॰ हे ईश्वर त्वां॰ अनन्यगतिरनन्यशरणः संश्रयामि॰ प्रपद्ये॰ प्रपद्ये संश्रयणक्रियाफल
स्य कर्तृगामित्वेन स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यात्मनेपदं तथापि श्रियं महेन्द्रना
थस्य जहार तनु मेदिनीमित्यादिप्रचुरकविप्रयोगदर्शनात् क्रियाफलस्य कर्तृगामित्वेऽपि प
रस्मैपदस्य साधुत्वमवगंतव्यं॰ एवं लक्षणलक्षितेश्वरस्य श्रुत्यागमप्रमाणकत्वोक्तिमुखेन कं प्र
तिपाद्यमर्थं प्रतिजानीते॰ वेदेष्विति॰ पुरुषस्य प्रवृत्त्यर्थं निवृत्त्यर्थं च प्रत्यक्षादिभिः प्रतिपत्तुमशक्य
स्य हितफलस्याग्निहोत्रादेरहितफलस्य ब्रह्महत्यादेः प्रतिपादनार्था वेदाः॰ प्रत्यक्षेणानुमि तथा वेत्ते
त्या वा यस्तूपायो न बुध्यते। एनं विदंति वेदेन तस्माद्वेदस्य वेदता इति तत्प्रामाण्य मीश्वरप्रणीतत्वे राम
नेनिता किं कानि निश्चियते॰ सकलप्रणीता वेदाः वेदत्वात् यन्नैवं तन्नैवमित्यनुमानमीश्वरप्रणी २

तत्वे प्रमाणं· श्रुतिश्च तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे· छंदांसि जज्ञिरे तस्माद्यजुस्त
स्माद्जायतेति· अस्यार्थः सर्वैर्यज्ञैर्हूयमानाद्यज्ञेश्वरत्वेन यज्ञशब्देनोपचरितात्तस्मादी
श्वराद् ऋग्यजुःसामानि जातानीति· नित्यत्वेन कर्तृदोषानुत्पादकत्वेनाम्नायप्रामाण्य
मिति मीमांसकाः तथा च जैमिनिना सूत्रितं तत्प्रमाणं बादरायणस्यानपेक्षत्वादिति।
उक्तं च भट्टाचार्यैः रागद्वेषादिकालुष्यं पुरुषेषूपलभ्यते। अतोऽप्रामाण्यशंकापि निष्कलंके
प्रसज्यते· वेदप्रमाणता तस्मान्नित्यत्वेनास्तुपेयतामिति· नित्यत्वेपि परमेश्वराद्वेदा निःश्वा
सवत्प्रयत्ननिःसारिता वेदाः प्रमाणमिति वैयासिकाः अत्र श्रुतिः अस्य महतो भूतस्य निः
श्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद इति· एतानि मतानि वेदप्रामाण्ये हरदत्ताचार्येणांगी
कृतानि· तथा च वक्ष्यति· वेदःस्वयं तत्पुरुषाय दिव्यप्रणीत इति· सर्वथा प्रमाणभूतेषु वेदेषु· वाशब्दः
समुच्चये· चास्याद्विकल्पोपमयोरिवार्थे च समुच्चये इति विश्वः· वेदेषु न दृष्टं यद्यपि श्रुतं तदृष्टमास्मृतिषु तत्रे

सु अत्र तंत्रशब्दः सिद्धान्तवाची । तंत्रं प्रधाने सिद्धान्ते इत्यमरः । पुराणानि शिवधर्मादीनि आगमसिद्धान्तेषु यतो न
मः शेषित्वादिलक्षणलक्षितस्य भवतः प्रतिपादकमुपक्रमादिषड्विधतात्पर्यलिंगैरधिकमखिलं
वाक्यं विचार्य विविच्य अहं । तात्पर्यपरमार्थतः संगृह्यते संक्षिप्यतेनेनेति संग्रहः ईश्वरप्रतिपादक
वेदपुराणवाक्यतात्पर्यप्रतिपादकं संक्षिप्तार्थग्रंथं स्तुतिरूपं किमालोक्यार्थत्वं विदधे कुर्वे महेश्व
र मत्यं प्रसीद प्रसन्नो भव । मां अर्जुनादयः केन त्वत्प्राप्तौ सन्निहिते तेनेत्यर्थः । पथा मार्गेण प्रवर्तये
स्य ॥२॥ नमः शेषित्वमाख्यातुमैश्वर्यैकनिबंधनं । महेश्वरपदस्यार्थमाह सो वैदिको चितं । मंत्र
ति । ईशानः सर्वविद्यानामीश्वरः सर्वभूतानामिति । तमीश्वराणां परमं महेश्वरं इत्यादय ईश्वर
विषया मंत्राः । यत ईश्वर इत्याह योऽथर्वशिखः कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाश राम
मध्यग इत्याह योऽथर्वशिखायामाम्नाता विधयश्च ते बहुधा बहुप्रकारैर्विलिख्योक्ते इंद्राभासोन ३
पेक्षनया बहूनामारण्यानपेक्षत्वेन प्रमाणं यः शब्दराशिरर्थप्रकाशकवाक्यरूपो वेदोऽस्ति सो

यमविमत्सरविशुद्धपदार्थतत्त्वोमात्सर्यरहितविद्वत्पर्यालोचितेश्वरादिपदार्थनिजस्वरूपः
सन् त्वां केवलमेकमीश्वरं प्रकाशयति· प्रकाशनं विदधत् स्मारयतः प्रशंसतो वेदवाक्यस्य सा
धारणो व्यापार इति प्रकाशयतीत्युक्तं· व्युत्पत्तिपर्यालोचनया ईश्वरशब्दो नीलकंठत्वादिलक्षणं
देवमेवाभिधत्त इत्याह। शब्दोयमिति। अयमीश्वरशब्दः श्रुतिगोचरः श्रोत्रेंद्रियविषयः सन् आना
लकं कंकालकूटलक्षणगादीषन्नीलं कंठं यस्येति सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परवचनमिति
कंठशब्दस्य परनिपातः अरतं सितचंद्ररेखं शिरोत्नबराहृतचंद्रशकलं त्वामेव निजार्थपोषात्
संबंधादीश्वरं बोधयति· निरतिशयैश्वर्यं निजार्थ ईश्वरशब्दस्य प्रवृत्तिनिमित्तं तस्य पोषात् संब
धात् ईश्वरं बोधयति अवगमयति। ईश्वरशब्दो योगरूढः सन् त्वामेवाभिधत्त इत्यर्थः अन्यं पुनः प्र
करणादिनिपीडनेन· प्रकरणादि· भिः प्रकरणलिंगौचित्योपपदपदांतरसमभिव्याहारादिभिर्नि
जनं पीडनं कुत्स्यार्थत्यागः तेन बोधयति॥ ॥अथ व्युत्पत्त्याकलनेप्यभिधाद्वयेवायं शब्दस्त्वामे
वाभिधत्त इत्याह। शब्द इति। अयमीश्वरशब्दः शिवपदादिवन्न वाभिधानं अभिधाद्वयबोधकं ना

मध्येयं अनन्यशब्दः अनन्यवाचकः नैघंटुकाः निगमयंत्येकत्रसंहत्या ज्ञातार्थमितिनिरुक्तवाक्यमेषां
५ नार्थवृत्तिः सितनिगमिमसीस्यो हिनोरणादिके तुनिसतिनिगंतवः संतः पृषोदरादित्वात्ककारस्य स्था
नेघकारे कृते नकारतकारयोः स्थाने णकारटकारयोः कृतयोर्निघंटव इत्युच्यंते तानधीयते विदंति
वेति ऋतूक्थादिसूत्रांतादितिठक् इसुसुक्तांतात्क इतिकादेशः नैघंटुका एनमीश्वरशब्दं शिवपर
दिवदभिधानमाहुः ईश्वरः शर्व ईशान इत्यमरः यद्येवमीश्वरशब्दविशेषणत्वेनोपात्तो महत्परमशब्दौ
तौ व्यावर्त्यालाभादनर्थकौ स्यातामत आह वस्त्विति। नैतावीश्वरशब्दार्थस्यान्ययोगव्यवच्छेदकौ
किंत्वयोगव्यवच्छेदकौ अत ईश्वरशब्दार्थमभिधातुं वस्तुत्वतावत्कृतं पूज्यत्वमेव ब्रुवाते॥ ॥ननु
प्रकर्षवाचिनोरेतयोः कथं पूजावाचित्वमित्याशंक्य प्रकर्षवाचिनावप्येतौ पूज्यमानेन समस्यमा
नौ सन्तौ पूजावाचिनावेवेत्याह। यस्येति। असौ परमशब्दो महच्छब्दो वा पूज्यवचनेन समस्यमा राम
नो यस्य विशेष्यस्योपसर्जनं विशेषणत्वादप्रधानं तदर्थं तस्य विशेष्यस्यार्थं प्रकृष्टं प्रकर्षाश्रितं अ ४
भिधातुमलं समर्थः शब्दविदो वैयाकरणाः सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैरिति सूत्रमित्यर्थः

प्रमाणं यदीति । असंदिग्धे संदेहवचनमेतत् । शास्त्राणि येन प्रमाणमिति । प्रमाणमेवेत्यर्थः । अत ए
तो शब्दो प्रयुज्यमानेन समस्यमानो सूत्रे ज्ञातः । यदीत्यस्य शब्दस्य समस्यमान इत्यस्य पदस्यानंतर
वाऽन्वयो द्रष्टव्यः । एवमीश्वरशब्दस्य नीलकण्ठत्वादिविशिष्टवस्तुनि मुख्यवृत्तिमभिधाय तत्प्रसं
गाज्जगतो नीश्वरत्वमनेकेश्वरत्वमपि निराचष्टे नानीश्वरमिति । एतद्विश्वमनीश्वरं सवितृकं ना
हीति । स्वतंत्रमधिष्ठातारं चेतनमंतरेणान्यथा हि रचेतनस्य जन्मासंभवात् । बह्वीश्वरं च नितरां सवितृकं ना
हीति । विमतं सकर्तृकं कार्यत्वाद् घटवदित्यनुमानेन सिद्धे कर्तरि एको नेको वेति संशये कल्पनालाघवा
देक एवेति कल्प्यते । बहूनां स्वतंत्राणां परस्परबुद्धिवैषम्यादसंभव एव तु च नोत्पन्नेरिति नितरामित्युक्तं ।
ननु विचित्रप्रासादादेरनेककर्तृकत्वस्यापि दर्शनात् कथं कर्त्रैक्यनिश्चय इत्यत आह अयथाप्रमाण
मिति प्रमाणमनतिक्रम्य यथाप्रमाणं यथा सादृश्ये इत्यव्ययीभावः । तत्र न वर्तते इति अयथाप्रमाणमि
ति नञ्समासः । प्रासादादावनेककर्तृकत्वस्यापि दृष्टत्वान्न तथास्तु । एतद्विश्वमनेककर्तृकत्वे प्रमाण
शून्यमित्यर्थः । कर्त्रैक्यं च वेदांतेऽप्युच्यते यतो वा इमानि भूतानि जायंते इति । तद्विजिज्ञासस्व तद्ब्रह्म

तस्यैकवचननिर्देशात् सिद्धमिति अन्येश्वरत्वं च निराकृतं तल्लोकेति लोकशब्देन पुराणादिकमुच्यते
लोकवेदयोर्विदितो जगत्कर्तृत्वेनेश्वरः तस्यैव जनिनेन परिहारेणालं परिहृत्य अहंकृत्स्यादित्वात्तनी
5 या॰ कतिचिन्मंदाः हरिहिरण्यगर्भादिकमनीश्वरं जगत्कर्तारमाहुः इतीयदयं कश्चिद्भ्रमः अनी
श्वरस्य जगत्कर्तृत्वकल्पनायां त्वातिरेककारणं॰ अयं भावः ब्रह्मविष्णुरुद्रेंद्राः संप्रसूयंत्येनं का
रणमिति॰ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा इत्यादिश्रुतिभ्यः कर्ता हि
सर्वलोकानां मम कर्ता महेश्वरः। तस्य देवाधिदेवस्य कर्ता कोपि न विद्यते। अतो ब्रह्मस्य वामांगे ब्र
ह्मा चैवास्य दक्षिणे। मुखेभ्यश्चतुरो वेदाः सांगोपांगाश्च हृत्स्थशः इत्यादि शिवरहस्याद्यागा
मवचनेषु च हरिहिरण्यगर्भयोरीश्वरादुत्पत्तिश्रवणात्। जगच्च कर्तृसापेक्षं कार्यं सावयवं यतः।
तस्माच्छिवः स्वतंत्रोयं सर्वशक्तिश्च तत्त्ववित्। अनादिनिधनश्चायं महदैश्वर्यसंयुतः। स एव जग
तः कर्ता महादेवो महेश्वर इति वायवीयसंहितायामीश्वरस्यैव जगत्कर्तृत्वश्रवणाच्च॰ हिरण्य राम
गर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्॰ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इत्यादी ५

नां हिरण्यगर्भपरमपुरुषयोर्जगत्कर्तृत्ववचनानां विश्वामित्रादिवज्जगदेशकर्तृत्वेनाप्युपपत्तेः कदे
कार्यकोटिप्रविष्टानां सर्वजगत्कर्तृत्वाऽसंभवात्तेषां सर्वजगत्कर्तृत्वकल्पना भ्रान्तिमूलैवेति॥
इदानीं पञ्चाशन्नामादिनामनीश्वरशब्दवाच्यत्वाभ्येरिदं सेश्वरं कोपि वदतीति वदद्व्यादी स्ववचनादेव प
राहन्यत इत्याह। विश्वमिति। सांख्यः सांख्यशास्त्रकर्ता कपिलो जगदिदम[?]नीश्वरमीश्वररहि
तमाह जगदुत्पत्तिस्त्वचेतनादव्यक्तादेव भवतीति· अतश्च संक्षेपमिमं शृणुध्वं नारायणः सर्वमिदं पु
राणः। स सर्गकाले च करोति सर्गं संहारकाले च तदत्ति भूयः किमन्यत्· वत्सविवृद्धिनिमित्तं क्षीरस्य य तदुक्तं
था प्रवृत्तिरज्ञस्य। पुरुषविमोक्षनिमित्तं प्रवर्तते तद्वदव्यक्तमिति· मोक्षशब्दो भोगस्याप्युपलक्ष
णं· पुरुषभोगापवर्गार्थं प्रधानप्रवृत्तिरिति· योगो योगशास्त्रकर्ता हिरण्यगर्भः सेश्वरं विश्वमा
ह अन्ये वादिनस्तु सांख्ययोगावनुवादिनः। तदुक्तार्थस्यानुवदितार इत्यर्थः अनीश्वरशब्दवाच्यैः
पञ्चाशन्नादिनिर्दिष्टैर्जगतः सेश्वरतां ब्रुवाणैः कापिलैरपि वादिभिस्तु न संभवति अनीश्वरेण सेश्वरं ब्रु
वाणः स्ववचनादेव पराहन्यते। न हि नारायणेन सर्वलोकं ब्रह्मणा या मनारायणकमिति

संभवति॥ ॥शिवैकवाचितामेवं प्रतिपाद्यैश्वर्यश्रुतेः। तत्प्रवृत्तिनिमित्तस्य नमःशोबित्वहेतुतां·
ऐश्वर्यस्य वदन्स्वक्ति नमःशोषित्वमीशितुः। स्फुटं त्रयोदशश्लोकैः श्रुतिस्मृतिपुरःसरं। ऐश्वर्य
मिति। हे त्रिभुवननाथ अस्यैश्वर्यं अनुपाधि निबंधनं देवांतरैश्वर्यवत्तन्नयमद्गुपाधिजन्यनिबंधनं
किंतु स्वतःसिद्धं· ब्रह्मादिदेवांतराणामैश्वर्यं तु त्वदाराधनजनितधर्मोपाधिनिबंधनं· तथा च शिव
रहस्ये· इंद्रनीलमयं लिंगं विष्णुः पूजयते सदा। विष्णुत्वं प्राप्यते तेन तस्माद्भुतैकं सनातनं· ब्रह्मा पू
जयते नित्यं लिंगं शैलमयं शुभं। तस्य संपूजनाद्देव प्राप्तं ब्रह्मत्वमुत्तमं। एवं विधमैश्वर्यं यस्मि
न् यस्मात्कारणात्त्वेतवास्तीति शेषः तस्मात्कारणात्तमसां नमस्काराणां त्वमेकः पात्रं
विषयोसि· सर्वत्र संगं सर्वसंबंधं मुक्त्वा नमो भवतीति तद्वाक्यं श्रुतिप्रसिद्धमेव· प्राचुर्येण न
दृश्यतइ भवति· नमो ब्रह्मण इत्यादौ क्वचिद्देवलं वनीतार्थः। ग्रामारण्यो पन्यासपुरःसरं नमःशो
षित्वं प्रतिजानीते· देवेति· हे देव दीव्यतेः क्रीडार्थत्वात् · देवशब्देन लोकत्रयक्रीडैव लोकैवल्य राम
मितिन्यायविषयो वालक्ष्यते· तेन निरतिशयस्यापि देवस्य सर्वजगन्नीमहित्वनियंत ६

त्यादिकं निरभिसंधिकमेव क्रीडारूपमनुपवर्णितं भवति॰ यस्मै नमस्तस्मै त्वा जुष्टं नियुनज्मि॰ य
स्मै नमस्तच्छिर इति श्रुतिद्वयवशात् तुभ्यं नमो नमः इत्येकविषयाण्यवधारयामो निश्चिनुमः॥
ननु देवान्तरविषयाण्यपि नमांसि श्रूयन्ते इत्यत आह। देवान्तरेष्विति॰ देवान्तरेषु ब्रह्मादिदेवे
ष्वपि विहितानि तान्यमूनि नमांसि स्रोतांसि स्रोतांसि जलप्रवाहाः सागर इव त्वय्यवसान
भूमौ संपतन्ति। अन्येषामनीश्वरत्वात्तत्राप्यवसितानि तद्देवतयाभिगं त्वामेव प्राप्नुवन्तीत्यर्थः
॥ ॥अनयोः श्रुत्योरर्थमाह। यस्मै नम इति। एका यस्मै नमस्तस्मै त्वा जुष्टं नियुनज्मीति श्रुतिः
नमस्विनं त्वा मन्त्रयोद्दिश्य पशोर्नियोजनमुवाच॰ अन्या च यस्मै नमस्तच्छिर इति श्रुतिः नवं तद्दि
व्याशिशुमारशिरोरूपत्वेन निरूपयितुमाह उभयेन श्रुतिद्वयेन॰ इत्थमुपपादितप्रकारेण नमो न
मस्कारं विधातुं तच्छेषित्वेन तात्पर्यतः प्रतिपादयितुं शक्यं॥ ॥श्रुतिद्वयेपि सर्वत्र नमोलक्षणः
कश्चिद्देवः प्रतीयते न तु तद्व्यक्त्य ईश्वर इत्याशंक्य पौर्वापर्यपर्यालोचनया प्रतीयत इत्याह। श्रु
त्योरिति॰ तं तं प्रदेशं श्रुत्योः पूर्वापरभागमनुसंदधतः पर्यालोचयन्तो विद्वांसः त्वामेव नमस्विन

मुच्यमानं शंसंति कथयंति॰ श्रुतिद्वयपौर्वापर्यपर्यालोचनया न मोलत्तरगं देवमीश्वरं निश्चि
न्वंतीत्यर्थः तथाहि मंदमतयोपि जडधियोपि आपतंतं गच्छंतं सवितारं किमप्यकुर्वीरन् किमपलपे
युः अतिस्फुटतयाप्रतीयमानं न कोप्यपलपतीत्यर्थः ॥१३॥ ईश्वरदेवताकं शूलगवाख्यं कर्मापि
श्रुतिर्योजनमंत्रस्य विनियोगाच्छूलगवाख्यकर्मणः पौर्वापर्यपर्यालोचनयापि तन्मंत्रस्ये
श्वरज्ञापकत्वं स्फुटमवगम्यत इत्याह॥ कर्मैवेति॥ शूलधर॰ अथ शूलगवः शरदि व
संते वेति बौधायनाश्वलायनोक्तं शूलगव[illegible] नामकं कर्मत्वदीयमेव॰ शूलोस्यास्तीति
शूली॰ अर्शआदिभ्योच्॰ शूलीत्यर्थः तद्वते रुद्राय योगो यागः स शूलगव इति श्रुत
त्रिपर्यालोचनया त्वदीयत्वं प्रतीयत इत्यर्थः॰ मंत्रलिंगादपि त्वदीयत्वमित्याह मंत्रा इति॰
ईशानाय त्वा जुष्टमुपाकरोमि॰ ईशानाय त्वा जुष्टं प्रोक्षामि॰ ईशानाय त्वा भुवनानामधिश्रियं
मृडो वर्चस्वे ति नवाय देवाय स्वाहा इत्यादयो बौधायनोक्ताः रुद्राय महादेवाय मृडाय वर्चसे हराय कृशाय श राम
र्वाय शिवाय भवाय महादेवायोग्राय पशुपतये रुद्राय शंकराय ईशानायाशनये स्वाहेति ७

यास्तेरुद्र पूर्वस्यां दिशि सेनास्ताभ्य एव नमस्ते अस्तु मा मा हिंसीरिति । कद्रुद्रायेमा रुद्रायाते
पितरिमा रुद्रायेत्याश्वलायनोक्ताश्च सकला मंत्राः त्वं तं प्रतिपादयंति । एतदुक्तं भवति त्वद्धि
तेन चतुर्थ्या विभक्त्या मंत्रवर्णे निर्देश्यते । देवतासंगतिस्तत्र दुर्बलं तु परंपरमिति मंत्रवर्णलिंगेन प्रमा
णेन शूलगवस्येश्वरदेवताकत्वनिश्चयात् मंत्रनिर्दिष्टस्य पशोर्नियोजनमंत्रस्येश्वरप्रतिपादकत्वमिति । स्थापी
अतस्त्वामंतरेण नमस्कारकृतलक्षणाय कस्मै देवाय निशुनजामनियोजयितुमवकाशं लभेमहि
स्वराद्यंतोपसृष्टादितिवक्तव्यमिति निहतवाद्युक्ते रामन्नेपदेन लाव्यं । निशुनजामेति परस्मैपदं न
मृग्यं । त्वं वा नियोजय । ईश्वरेणाप्यन्यदन्यन्नियोजयितुमशक्यमिति भावः ॥ यस्मै नमस्तच्छि
र इति श्रुतिरपि पौर्वापर्यपर्यालोचनया परिशेष्यमाणेन त्वामेवगमयतीत्याह । अंगांतरेष्विति ॥४॥
यस्मै नमस्तच्छिरो धर्मो मूर्धन्तिं ब्रह्मा पोतरा हनुयज्ञोधरा विष्णुर्हृदयं संवत्सरः प्रजननमश्विनौ पूर्वपा
दावत्रिर्मध्यं मित्रावरुणावपरपादावग्निः पुच्छस्य प्रथमकांडं ततइंद्रस्ततः प्रजापतिरभयं चतु
र्थं स वा एष दिव्यः शार्करः शिशुमार इति तैत्तिरीयश्रुतौ शिशुमारतया निरूपितस्य तैस्यांगांतरेषु कश्यप

शिरोव्यतिरिक्तावयवांतरेषु मूर्धोन्नतिरहस्त्वधरहनुहृदयप्रजननेंद्रियसर्वपादमध्यापरपादपुच्छप्र
थमकांडद्वितीयतृतीयचतुर्थकांडाख्येषु विबुधांतरसंस्तुतेषु· धर्मब्रह्मयज्ञविष्णुसंवत्सराग्न्यात्रि
मित्रावरुणा। मेंढ्रे इंद्रप्रजापतिसंसारलयनिवर्तककालसंख्याख्यदेवतांतरत्वेन संस्तुतेषु तल्लक्ष्मकतया
लिखितेषु शिशुमारशिरः संस्तवाय सर्वं परिशिष्यसे परिशिष्टोऽसि· यद्यपि सर्वे देवा योऽपि प
रिशिष्टा बहवः संति· तथापि स्तोमं वो अद्य रुद्राय शिक्वस इति मंत्रेण शिवस्यैव नमः स्वामितायाः स्फु
टतरावगमात्तस्यैवात्रापि परिशिष्टता न्याय्येति परिशिष्यस इत्युक्तं। हे ईश्वर तस्मै ते नमोलविदुंसां
प्रतं युक्तं· अनीश्वराय देवांतराय कथंचिन्नवितुं न सांप्रतं अनीश्वरः स्यात एव नमस्कारानर्हः किं पुनरीश्वरे
तिष्ठतीत्यर्थः। ईश्वर इत्यनेनेश्वरत्वमेव नमःसंबंधकारणमित्युक्तं॥ १४॥ ॥ रंगोपजीविनोऽपि यतो
नमस्कारमुद्रयालंवन्नमत्विनयस्य लोपि नमः शोषि त्वं तवैवयुक्तमित्याह। पावज्रिणीति· हे शंक
रस्मरतापोद्दिष्टा न रतेन महर्षिणा उपदिष्टा वज्रिण्याख्यमुद्रालंवति विघ्नेशं रिवनीयाख्यमुद्रालंव राम
ति· कमलिनीयाख्यमुद्रालंवति· तानि विबुधांतराणां शक्रविष्णुब्रह्मणां क्रमेण त्रिनयालंवत्वि॥ ८

तेमौलिस्पृशाशिरःस्पर्शिन्याकरपुटांजलिमुद्रयानमस्कारमुद्रयानमस्कारां ऽलिनयो नयति· तदुक्तं·
वज्रिरग्यमुद्रयाशक्तं पश्चिन्या दर्शयेद्विधिं। शांखिन्या केशवं रुद्रं शिरस्यंजलिमुद्रयेति·
एवमीश्वरैकत्वगतयानूमस्तांप्रमाणासिद्धेरन्येदेवाजनैर्दत्तान्यपिनमांसिस्वीयतयाग्रहीतुंम
शक्नुवंतीत्याह· इत्रमिति। देवताभ्यो ब्रह्मादिभ्यः इत्रं किमपि नमः श्रृणुमः। नमो ब्रह्मणे नमो अस्त्व
ग्नये नमः पृथिव्यै नम ओषधीभ्यः। नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि इत्यादिश्रुति
भ्यः श्रुयं श्रुतवंतः। न ममात्मवश्मान्नूमिं त्वामंतरेण विनात्माः देवताः तन्नमो ग्रहीतुं स्वीकर्तुमिनत्वं
हि यस्मात्कारणात् कश्चिदपि नमस्कारं चौरोपनीतं किरीटमिव धारयितुं स्वीकर्तुं न हे· तथा नयभवति·
च मरुतः अक्षरस्य ऋचः समामनंति· स्तोमं वो अद्य रुद्राय शिक्कसे क्षयद्वीराय नमसा दिदिष्टन·
येभिः शिवः स्ववां एवयावभिर्दिवः सिषक्ति स्वयशा निकामभिरिति। हे मरुतः स्तोमं स्तोत्रं वो युष्माकं अस्यार्थः
शिक्कसे शक्ताय निग्रहानुग्रहक्षमाय· क्षयद्वीराय क्षयन्तो निवसन्तो वीरा वीरलजादयो गणा यस्य
तस्मै नमसा नमस्कारेण मह दिदिष्टन प्रयच्छत· येभिः एकवचनोपात्तयोरपि स्तुतिनमस्कारयो

५ नानाविधत्वाद्बलिभिरितिबहुवचनं। येलिः येः स्तुतिनमस्कारैः स्यवानू स्यामी· स्वयशाः अनन्यसाधा
रणयशाः एवयावलिः एवा एतव्याः कामाः तेषु सावलिरापतद्भिः कामे कामे समापतद्भिरित्यर्थः
निकामैः फलैः दीव्यंतीति दिवो देवान् युष्मान् सिषक्ति संयोजयति। अयं भावः हे मरुतो यु
ष्मदुद्देशेनास्माभिः क्रियमाणानि नमस्तोत्राणि रुद्राय प्रयच्छत· तैः स्तुतिनमस्कारैः
स्यवानीश्वरः तदपेक्षितैः फलैः दिवान् सर्वान् ह्यशान् संयोजयति तस्मादन्यविषयाणामपि नम
सामीश्वरपर्यवसानं तदन्निआयेराकश्यपेतृताधिपत्येन संस्तुते सर्वं तेन मह इति श्रुतिः
नन्याकाशात्पतितं तोयं यथा गच्छति सागरं। सर्वदेवनमस्कारः केशवं प्रतिगच्छतीति के
शवस्य नमस्कारपर्यवसानत्वमितीक्ता· सत्यं· तथापस्यवाक्यस्य स्मृतित्वेन स्तोमं वहत्या
दि श्रुतिविरोधाद्विरोधाधिकरणन्यायेन सर्वं दहेन स्मृतिवदप्रामाण्यं वक्तव्यं· विरोधे
त्वनपेक्षं स्यादसतिह्यनुमानं। ज्योतिष्टोमे महावेद्यां सदो नामकस्य मंडपस्य ×तथाहि× राम
मध्ये काचिदौदुंबरीशाखा निखन्यते· तस्याश्च वाससा वेष्टनं स्मर्यते· औदुंबरी सर्वावे १५

दूषयितव्येति तत्र संशयः एषा स्मृतिः प्रमाणं न वेति तत्र पूर्वाधिकरणे ऽष्टकाः कर्त्तव्या इत्यस्याः स्मृतेर्मूलि
वेदानुमापकत्वेन प्रामाण्यमुक्तं तेनैव न्यायेन सर्ववेष्टनस्मृतिः प्रमाणमिति पूर्वः पक्षः। औदुम्बरीं स्पृ
ष्ट्वोद्गायेदित्यनेन प्रत्यक्षवेदवाक्येन स्पर्शो विधीयते न च सर्ववेष्टने स्पर्शः संभवति. अतो वेदमू
लानुमानं कालात्ययापदिष्टं तस्माद्द्विजत्वं न कदाप्यबाधितत्वात्सर्ववेष्टनस्मृतिरप्रमाणं.
तद्वत्केशवनमस्कारपर्यवसानस्मृतिरप्रमाणमितीश्वरस्यैव नमस्कारपर्यवसानतां गी
कार्येति सिद्धं।७ नत्वीश्वरादन्येषां नमस्कारान् हत्वा अद्विषयो नमस्कारो व्यर्थ इत्यत आ
ह। तस्मा इति। यत्राधिष्ठाने त्वं निषीदसि तस्मै अधिष्ठानाय नमो नमस्तु. अत्र श्रुतिः नमस्ते अ
स्त्वायते नमो रुद्र परायते. नमो यत्र निषीदसीति. यत्र निषीदसीत्येतन्मंत्रोपात्तं इष्टं अनया
दिशा तु अनेन न्यायेन सर्ववस्तु नमस्यं नमस्कारार्हं तत्रोदाहरणमाह अपीति औषधीरपि
अप्युद्दिश्य नमस्कारं वयमामनामः क्रमः नमो ब्रह्मणे नमः इत्यादिश्रुतौ श्रुतं नमस्कारमधीम
हीत्यर्थः म्ना अभ्यासे इत्यस्य धातोः पा घ्रेत्यादिना मनादेशः तत्र हेतुमाह देहीवेति. देही

10 देहमिवयेनकारणेनविश्वमधिष्ठितोसि॰ अंतर्यामितया। विश्वस्मिन्वर्तसे॰ तथाचबृहदारण्यके
यःपृथिव्यांतिष्ठन्पृथिव्याअंतरोयंपृथिवीनवेदयस्यपृथिवीशरीरंयःपृथिवीमंतरोयमयत्ये
षतआत्मांतर्याम्यमृतइति॰ पुराणेच॰ शिवेनाधिष्ठितंसर्वंजगदेतच्चराचरं॰ शश्वत्सर्वस्तथाज्ञात्वान सर्वरूपधर
मुह्यतीति।२७। अनेनैवन्यायेनात्यंतनिकृष्टाःश्वाद योपिनमस्यतयाश्रुताधृष्टाइत्याहसर्वमि
ति। सर्वंजगत्त्वयाधिष्ठितंमत्वाश्वानस्तेषांपतयश्चश्रुतौनमसिताः नमोविषयत्वेनश्रुताइति
शेषः नमःशङ्कानमोवरिवश्चित्रऊःक्यजितिक्यचिनिछायामि[illegible]लोपेयस्यहल इतियलो
पेरूपं॰ ननुयत्रनमःसंबंधश्रुतिरस्तितत्रतथास्तु यत्रनतत्रकथंनमस्यत्वमित्यतआहलोक
इति॰ हेमहेश्वरत्वयमर्पितवस्तुक्रियोगान्नमस्कारसंबंधात्लोकेबहुमानपात्रनमस्कारपूजापात्र
तामारोपिताःप्रापिताः माहृशांतुनमस्यत्वेनकिरेवकारणामित्यर्थः। तथाचशिवपुराणे॰ स
कःप्रियोमेसततंयथार्थंकौंचरूढ़न। तस्यसंपूजनाद्धत्सप्रजितोहंनसंशयइति।२८। सर्वेषा राम
मपिनमस्यप्रयोजकदेवित्याहद्वैविध्यमेवेत्याह। द्वधेति॰ हेविषमलोचनविमृशतःपुरुषस्य १०

वं सन्निकर्षकृत एव नमःप्रयोगः प्रायो वरीयसि श्रेष्ठे दृश्यमा

लोके वेदेषु च नमो द्वेधा प्रतिजानाति अन्यरूपं अन्यद्रूपं प्रकारो यस्य तत् प्रकारांतरयुक्तं न जातिः द्वैविध्य
मेवाह यदिति॰ त्वयि विषये यन्नमः न हीश्वरता प्रयुक्तं तन्नमः स्वामिता प्रयोजनिनि॰ अनीश्वरेष्वी
श्वरान्येष्वप्ययन्नमस्तत्सन्निकर्षविहितं तत्संबंधप्रयोजिनि॥१९॥ ननु नमस्कृत्य वरीयांसमु
मुपचरंतीति श्रुत्या वरीयस्त्वमपि नमो विषयत्वे प्रयोजकं प्रतीयत इत्यत आह। त्वदिति॰ श्रे
श्रेष्ठे दृश्यमानः सन् श्रेष्ठत्वप्रयुक्त इति कल्पयितुं न शक्यं यतोऽश्रेयसामपकृष्टानां श्वादीनामपि
नमोऽसि निदर्शितानि उदाहृतानि। तस्मात् सन्निकर्ष एव नमस्यत्वे प्रयोजको न श्रेष्ठभाव इति ला
वः नमस्कृत्येति श्रुतिस्तु सन्निकर्षप्रामाण्यानुवादः॥२०॥ अस्तु वा श्रैष्ठ्यं नमस्यत्वे प्रयोजकं तथा
पि लवतो नमो लक्षणत्वेन दोष इत्याह श्रैष्ठ्यप्रयुक्तमिति। श्रैष्ठ्यप्रयुक्तमपि नमस्त्वदीयं नाम
त्वत्संबंधि खलु॰ अग्रियाणां पशूनां पतिः यस्त्वं क्रतुभुजां देवानां मध्ये श्रेष्ठोऽसि॰ तथा च नमस्ते होम
वाः। आद्ययारूढः प्रथमान एति श्रेष्ठो देवानां पतिरग्रियाणामिति अत्र श्लोकेऽग्रियाणामिति प
दस्य श्रुत्यनुकरणत्वात् साधुत्वं॰ किंच हिलगवक्षाममगानां कृच्छ्रेपविते सुर्मे त्रेधु अविशेषतः सा
मान्येन श्रेष्ठः श्रुतोऽसि। नमो ज्येष्ठाय च श्रेष्ठाय चेति॥२१॥ एवं च x ग्रंथ x यो हि शश्लोके रूपपत्तिर्दु

तितत्प्रसंगा
दथोच्यतेर
॥

रःमरां नमोलक्षणामीशस्य सरूपं चं निरूपितं। देवांतरैः सहनमः स्तुत्या कानान्यपीशितुः। सहतेने
श्वरस्यैतत्प्रसंगादधुनोच्यते। देवांतरैरिति। देवांतरैः सहनमः स्तोत्राकानानि तेलोपायनालं
नसमर्थानि· किंतु विपर्ययाय कोधायैवालं· तथा च दाशतयी कुश्रूयते· मात्वारुद्रचुक्रुधामा
नमोभिर्मादुष्टुती वृषभमा सहूतीति· अस्यार्थः हे रुद्र नमोभिः देवांतरैः सहनमस्कारैः दुष्टुती
दुष्टुत्या सहऔकानेन मा चुक्रुधाम। कोपयाम· नैरुक्तास्त्वव्याचक्षते· किंच तुल्यनमस्कारैर्देवां
तरैर्देवगामिभिः। दुष्टुत्या सदृशस्तुत्या समानाह्वानकर्मणा· न वयं चुक्रुधाम त्वां सर्वलोकनमस्कृ
तेति· शिवतत्त्वनिरूपणं च· यो महादेवमन्येन हीनदेवेन तुमतिः। सह स्वात्मार्गणं [illegible] स्तोत्यजोनां धा
त्यजोंत्यजः। ननु सोमारौद्रं चरुं निर्वपेत्प्रजाकाम इत्येतस्मिन् पुत्रकामचरुविधि [illegible] वाक्ये सोमेनस
हरुद्रस्य निर्देशात् तत्र विनिर्मुक्ते तु याज्यापुरोनुवाक्यामंत्रे तु सोमेन सहाह्वानं रुद्रस्यांगीकार्य
मित्यत आह। पुत्रार्थिन इति· पुत्रार्थिनः काम्यचरुविधौ सोमारौद्रं चरुं निर्वपेत्प्रजाकाम इति च
रुविधियुक्तवाक्ये सोमेन सहहूतं निर्दिष्टं रुद्रं रुद्रशब्दवाच्यदेवतामग्निमनुष्टुभुम· अंतरा इत्यर्थवाद राम
वाक्यान्निश्चितवंतामित्यर्थः। उत्तरश्लोकेनार्थमेवं दर्शयति। अग्निमिति। अत्र [illegible] शब्दोविधि २१

एतश्लोकपाठ्नुत्तरश्लोकार्थेन· २३ आह्लण

परः शेषे ब्राह्मणशब्दः इति जैमिनिसूत्रे मंत्रव्यतिरिक्तार्थवादेषु ब्राह्मणशब्दस्य रूढत्वात्. अत्र ब्रा
ह्मणे सोमारौद्रं चरुं निर्वपेत् प्रजाकाम इति सोमरुद्रदेवताकचरुविधानानंतरं सोमो वै रेतोधा अग्निः
प्रजानां प्रजनयिता सोम एवास्मै रेतो दधात्यग्निः प्रजाः प्रजनयति इति विधिशेषरूपार्थवादवाक्ये
अग्निप्रशंसनात्. अविहितस्य प्रशंसाऽयोगाद्विधिवाक्येपि रुद्रशब्देनाग्निर्विहित इति संदिग्धे
षु वाक्यशेषादिति न्याये न निश्चीयते. संदिग्धेषु वाक्यशेषात्. अक्ताः शर्करा उपदधाति तेजो
वै घृतमित्यत्र संशयः घृततैलपयसामन्यतमेन येन केनचिदंजनं कार्यमुत घृतेनैवेति. तत्र प्र
धानं विधिरर्थवादस्त्वंगं न चांगेन प्रधानं बाधितुं शक्यं विधिश्चाक्तविषयत्वा यथाश्रुत एव न त
यः अर्थवादश्चानुवादत्वात् लक्षणयापि नीयमानो नानीयत्वमुपैष्यति. तस्माद्येन केनचिदंजनमि
ति पूर्वपक्षः। निर्विशेषेण सामान्येन व्यवहारानवाप्तेः काङ्क्षितविशेषउपादेयोऽसति विशेषे
प्रमाणे अस्ति तु घृतग्रहणे प्रमाणमर्थवादः स हि घृतं स्तुवन् विधेयस्य तु सद्योगाद्विधेयत्वं गमय
वत्रा ति तस्मात् घृतेनांजनमिति सिद्धांतः एवमर्थवादप्रस्तावात्तु विधिवाक्ये रुद्रशब्दोऽग्निवाचक इति. यत्रे
श्वरस्याकोनं तत्र हस्तथगेवेत्या हआकाननमिति. तत्र क्रि विदः प्रातरग्निं प्रातरिंद्रं हवामहे इति क्रि

यावन्मंत्रवाक्यं पठंति॰ अत्र मंत्रवाक्ये नवत आह्वानं प्रथगेव दृष्टं॰ ।२३।। एतस्य मंत्रस्य तात्पर्यमाह
अग्न्यादिभिरिति॰ प्रातरग्निं प्रातरिंद्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना। प्रातर्भगं पूषणं
ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेमेति मंत्रः तत्राग्न्यादिभिर्देवैः कृतिशंका आह्वाने शंका
माभूदिति मत्वा प्रकृतं प्रस्तुतं त्वा अत एवानुषंगयोग्यमनुवृत्तियोग्यमपि हवामहे इति क्रियापद
मपास्य परित्यज्य क्रियापदांतरेणात्वा माङ्कयन्नुत शब्देनांतरितत्वात् आह्वानस्य देवतांतराह्वानस
दृशत्वां भिन्नत्वं निराचष्टे॰ रुद्रमुत रुद्रमपि आह्वातुं त्वं नेमहीत्यर्थः ।।२४।। ननु कथमग्नौ रुद्रशब्दप्रवृ
त्तिरित्याशंक्याग्नौ रुद्रशब्दप्रवृत्तिनिमित्तं मंत्रवदनूदितं प्रसंगाद्व्याख्यानपि रुद्रशब्दव्याख्यानमथाप्रसिद्धवृत्ति
निमित्तेन सह श्लोकत्रयेण प्रतिपादयति। न्यासीकृतामिति। अमरैर्देवैर्न्यासीकृतं निक्षिप्तं वसु
तेनाग्निर्द्वाहृमत्वागतो रुदितवान् रुदिरं तल्लावितरग्यर्थः रोदितवानित्यर्थः इति हेतोरग्निं रुद्रश
ब्दवाच्यमवैमि॰ तथा च कृष्णयजुः प्रथमकांडपंचमप्रपाठके प्रथमानुवाके श्रुतिः देवासुराः सं
यत्ता आसन् ते देवा विजयमुपयन्तोऽग्नौ वामं वसु संन्यदधत इदमु नो भविष्यति यदि नो जेष्यंती राम
ति तदग्निर्न्यकामयत तेनापाक्रामत्ते देवा विजित्यावरुरुत्समाना अन्वायन् तदस्य सहसादि १२

त्संत सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति अस्यार्थः देवासुराः युद्धाय संयत्ताः सन्नद्धा आसन्ते
देवा विजयमुपयन्तो जेतुं गच्छन्तोऽग्नौ वामं श्रेष्ठं वसु धनं संन्यदधुत सम्यक् निहितवन्तः तच्चेह
तुमाहरेयमिति असुरा नोऽस्मान्यदि जेष्यन्ति तदा सर्वास्मिन्नन्यास्मिन्वस्तुन्यपहृते इदं नोऽस्मा
कमुपासनं भविष्यतीति निश्चितवन्तः तद्वसु अग्निरेकाकी मयेतद्ग्रहीतुमैच्छत् तेन धनेन सहापा
क्रामत् अन्यत्र गतवान् देवा असुरान्विजित्याऽग्निं तद्धनमपरूरुत्समाना रोद्धुमिच्छन्तः तमग्नि
मन्वायन् आगच्छन् अस्याग्नेर्हितास्मिंस्थितं तद्वसु सहसा बलेन आदित्सन्त आहर्तुमैच्छन् अग्नि
स्तु तद्वसु दधत्तान्नरोदीत् रोदयति स्म तस्मादग्नेरुद्रत्वमिति · रोदेर्णिलुक्चेति सूत्रयंतात् रुदिर्
अश्रुविमोचने इति धातोः रक्प्रत्यये णिलोपे च रुद्रशब्दो निष्पन्न इति · मरुतो मरुन्नामकान् देवान् रे
रणान् पारिषदांश्च त्वं उग्रवतया रुद्रानयैमि · आत्मा वै पुत्रनामासीत्यादौ पितृपुत्रयोरभेदः।
श्रयणाद्रुद्रशब्दस्तु च्वेषु त्वदिलिङ्गेषु मरुत्सु गणेषु च वर्तत इति भावः मरुतां पितस्त्वमहेथ

रस्य वरुथो मंत्र आ ते पितर्मरुतां सुम्नमेतु· मरुतां पितस्तदहं गृणामीत्यादयः मरुतां रुद्रशब्दा
भिधाने मंत्र आ रुद्रा सोम [illegible] तः सजोषसो हिरण्यरथाः सुविताय गंतनेति· आ रुद्रासो रुद्राः
मरुतः सजोषसः प्रीतियुक्ता हिरण्यरथा हिरण्मयरथाः सुविताय कल्याणाय आगंतन आगच्छ
तेत्यर्थः गणानामीश्वरा उत्पन्ना इत्यादित्यपुराणे· प्रजाः सृजेति निर्दिष्टश्चन्द्रमौलिर्विरिंचिना। सस
र्ज मनसा रुद्रान् नात्मतुल्यान्महेश्वरः। नीलकण्ठांस्त्रिनेत्रांश्च जटामंडलमंडितानिति· पार्ष
दानां रुद्रशब्दाभिधाने श्रुतिः सहस्राणि सहस्रशो ये रुद्रा अधि भूम्यामिति· रुद्रावणेन स्तुता
नां रुद्रो दुःखस्य दुःखहेतोर्वा द्रावणेनापसारणेन अहृष्टाभिमित्तेन रुदं द्रावयतीति रुद्रमवैमि·
तथा च पुराणवचनं· रुद्दुःखं दुःखहेतुर्वा तद्द्रावयति नः प्रभुः। रुद्र इत्युच्यते सद्भिः शिवः परमकार
णमिति· अथवा रुतात्माद्येन सकलं जगद्भाववति रंजयतीति नाद्यात्मकत्वाद्रुद्र इति। अथवा रुताः श राम
ब्देन प्रणवरूपेण वेदरूपेण वा द्रावयति इष्टमर्थं गमयतीति रुद्रः। अथवा संसारचक्रपरिवर्त्तिन १३

स्तत्के शापरंप्रणामनुलवतः प्राणिनोदुष्कृतपापिष्ठान् रोदयतीति रुद्रः अथवा सर्वाणि भूतान्यन्तका
ले रोदयतीति रुद्रः चशब्दस्यानुक्तसमुच्चयार्थत्वादेतान्यपि प्रवृत्तिनिमित्तान्याचार्येणविवक्षिता
मितिः२६। नि॰ यज्ञोपि रुद्रपदेयज्ञेयागेपि आरुणकेतुकोक्तं॰ आरुणकेतुकाख्यो यजुर्वेदभाग आरण्यके उक्तं
एतद्रुद्रस्यधनुः रुद्रस्यत्वेवधनुरार्त्निः शिरउत्पिपेष सप्रवर्ग्योभवत् तस्माद्यः सप्रवर्ग्येणयज्ञे
नयजते रुद्रस्यसशिरः प्रतिदधातीति॰ तस्माद्यज्ञप्रवर्तकं किं यज्ञे रुद्रप्रवृत्तिरित्याशंक्य रुद्रसंबं
धित्वादित्याह। तच्छब्दमिति। तदीयमपि तत्संबंध्यपि वस्तु तच्छब्दं स स्वामिवाचकः शब्दो वाचको यस्य
तच्छब्दं स्मरंतीति॰ यथाराजकीयो राजशब्दवान् तथायज्ञसंबद्धोपि यज्ञशब्दवान्॰ यज्ञोपि रुद्रशब्दवा
निति भावः अनेन तदीयत्वमपि तच्छब्द प्रवृत्तिनिमित्तमित्युक्तं आरुणकेतुकोक्तरुद्रशब्दस्य
यज्ञवाचित्वं तत्समानार्थश्रुत्यंतरोदाहरणेन स्पष्टयति॰ यद्दिति॰ यद्यस्मात्कारणात् तत्प्रदेश
गतरुद्रपदावकाशे आरुणकेतुकाख्य यजुर्वेदारण्यकभागगतरुद्रपदस्थाने सामगैर्न्योयज्ञ
स्यैवतच्छिरः प्रतिदधातीतिश्रुतेः यज्ञस्येतिपदमनुश्रुश्रुम॰ आरुणकेतुकसमानार्थायां यज्ञ

स्यैवताच्छिरः अतिदृधानीत्यस्यां सामश्रुतौ रुद्रशब्दस्य स्थाने पतत शब्द अवयोनगतिसामान्या
दितिन्यायेनारुणकेतुकेपि रुद्रशब्दो यज्ञवाचीत्यवगंतव्यमिति भावः ।२६॥ संताप्येति ॥ संताप
मुत्पाद्य प्रसभबलात्कारेण जनानां रोदयितरि ज्वरेपि रुद्रशब्दमाहुः तत्र श्रुतिः रुद्रः खलु वैवास्तो
ष्पतिर्यदकृत्वा वास्तोष्पतीयं प्रयायाद्रुद्र एनं भूत्वाग्निरनूत्थाय हन्यादिति · रुद्रो महेश्वरो वास्तोष्प
तिः नमो रुद्राय वास्तोष्पतय इति दर्शनात् वास्तोष्पतीयं वास्तोष्पति संबंधिनं गार्हपत्यं अकृत्वा
प्रयायाद्देशांतरं गच्छेत् अग्निर्गार्हपत्य एनमकृतं रुद्रो ज्वरो भूत्वा हन्यादित्यर्थः रोदयतीति
रुद्र इति रोदयितृत्वमेव रुद्रशब्दस्य प्रवृत्तिनिमित्तं क्रूरशब्दापरपर्यायत्वेन प्रयुज्यमानस्या
ऽरप्रत्ययांतस्य रौद्रशब्दस्य प्रकृतिर्ज्वरवाचक एव रुद्रशब्द इत्याह । रौद्रमिति · रौद्रपदं तत्प्रकृ
तिकं ज्वरवाचकरुद्रशब्दप्रकृतिकं ज्वरवाचिनो रुद्रशब्दात्तस्येदमित्यणि सति रौद्रशब्दो निष्प
न्न इति भावः अथवा वायसशब्दवत्तद्धितांतप्रतिरूपकं [illegible] शब्दांतरं भवति यथा वयः राम
शब्दात्तद्धिते सति वायसशब्दः न किंतु तद्धितांतरूपप्रतिरूपकः शब्दोन्यः कश्चिदित्याशंका १४

निवृत्त्यर्थं तेषां बहुत्वमाह। संख्येवेति। भागवत सात्वत सन्निभानि तद्धितांत पद प्रतिरूपकाणि ब
हूनि। यद्वा कुः वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य एव च। कारुषश्च द्विजन्मा च मैत्रः सात्वत एव च। अ
च्छसात्वतो नाम। विष्णोरायतनान्यपि। पूजयत्याज्ञया राज्ञः स तु भागवतः स्मृत इति। भागवत
शब्द प्रकृतितया शंक्यमानं भगवच्छब्द रूपमपि तद्धितांत पद प्रतिरूपकमित्याह। स्यादिति।
भगवानिति शब्द रूपं तादृगेव तद्धितांत पद प्रतिरूपकमेव भगवच्छब्दस्य। विरूढत्वात्। ऐश्वर्य
स्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा इति वचनात् ऐश्वर्या
दिषाड्गुण्य वाची भग शब्दः। तस्मान्मतुपि सति निष्पन्नो भगवच्छब्दः स्वाङ्गुणके परम गुरुष्वेव वर्तत इ
त्यत आह। षाड्गुण्य इति। षड्गुणा एव षाड्गुण्यं चातुर्वर्ण्यादित्वात् स्वार्थे उपसंख्यानमिति स्वार्थे ष्यञ्।
तद्धेतुः प्रवृत्तिनिमित्तं यस्य तत् भगवच्छब्द रूपं तत्त्वन्येनोपेतेति। चाभिधत्त इत्यर्थः। २८॥ ॥सका
नुषक्त भगवन्निरूपणप्रमुखेन सः। एकपादाधिकै रत्र। द्वाभिः श्लोकार्द्ध संयुतैः। ऐश्वर्यप्रमुखाशेष
गुणकत्वन्तु लक्षणं। प्रतिपादयतीशस्य श्रुतिन्यायपुरःसरं। ऐश्वर्यमिति। अज्यमशेषमैश्व
र्यं अनुपाधिमती लक्ष्मीः ज्ञानं च वीर्ययशसी च विरागिता वैराग्यमित्येते भगसंज्ञया भगशब्देनोक्ताः

ते षड्गुणा अपि संतीत्यनेन हेतुना हे भगवन् त्वं भगवान् इति सिद्धं ॥२२॥ ऐश्वर्यादिगुणसद्भावे किं प्र
15 माणमित्याशंक्य ईश्वरादिपदश्रुतिरेव प्रमाणमित्याह। ऐश्वर्यमिति। ईश्वरपदश्रुतिः श्रुतिलिं
गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति जैमिनिसूत्रो
क्तं प्रमाणं। पक्षांतरनिरपेक्षः शब्दः श्रुतिरिति श्रुतेर्लक्षणं। यः शब्दश्रवणादेव विनियोगः प्रती
यते स श्रौत इति वचनादीश्वरशब्दश्रुतिमात्र एवैश्वर्यविशिष्टस्तु स्ववाच्यतया संनिधत्ते बोधयतीति।
ईश्वरपदश्रुतिरेव सद्भावे प्रमाणमित्युक्तं उग्रशब्दो वीर्यं संनिधत्ते। अयं भावः उग्रत्वमासिनत्व
यित्वस्य तज्जवीर्यं विनमंतरेणानुपपन्नं स वीर्यं बोधयतीत्यर्थं निराविनाभावः श्रुतसामर्थ्यलि
ङ्गानुग्रत्वलिंगं वीर्यसंनिधत्ते इति उग्रशब्द इत्यनेन यद्यप्यत्रापि श्रौतोयं विनियोग इति प्रती
यते तथापि लिंगस्यापि श्रुतिकल्पनयैवार्थविनियोजकत्वांगीकारादुग्रशब्द श्रुं इत्युक्तः। शिवपदं
यशोसंनिधत्ते निःशेषकल्याणगुणाधारत्वं शिवत्वं अथवा शेषकल्याणगुणैरीश्वरः शिव इत्युच्यते कथनई
सद्भिः शिवतत्त्वार्थवेदिभिरिति पुराणवचनाच्छ्रौतसकलकल्याणगुणवाचि शिवपदं कल्या राम
का णगुणान् यतानं तत्त्वसंनिं यशो संनिधत्ते इति भावः। भवतः सार्वज्ञ्यं नविरलो यथाक्रमेण संभवति २५

कामरिपुशब्दस्यांशसमर्थितो अभिहितो सर्वविषयनित्यज्ञानाधारत्वं सर्वज्ञत्वं· ऐहिकामुष्मिकाभि
लाषवैमुख्यं कामरिपुत्वं त एवौ सर्वज्ञकामरिपुशब्दौ ज्ञानवैराग्ये अभिदधाते इति भावः। ननु श्री
जनकगुणसद्भावेन किंचिद्धिंसाशंक्यस्वानं इत्यत्वेन विषयविमुखस्य शिवस्य साक्षात् कोर्तिज्ञानमि
त्यादिपदश्रुतेरभावोपि श्रियाश्लेषस्यान्येषां श्री प्रदानस्य च श्रुतिषु अभिहितत्वात् श्रीजनक इत्याह
अर्थ इति· हे शिव विरज्यतो वैराग्ययुक्तस्य सतः रंज राग इत्यस्य शत्रंत स्य शब्य निरूपं· ते श्रिया
संपदा कोप्यर्थः प्रयोजनं नास्ति दशशतयोनिः दश अवयवा उपास्या अस्या इति दशतयी ऋ
क्संहिता तत्संबंधिनी त्रिसूत्र पठिता श्रुतिरित्यर्थः श्लेषो जातस्य रुद्र श्रिया तव वस्तु मस्तव सांव सु
त्रबाहो इति· अस्यार्थः हे वज्रबाहो वज्रं बाहौ यस्य· सुक्षिमास्थाय जातस्य· व्यत्ययेन प्रथमार्थे वि
सु भक्ती· जातरुद्ररूपेण प्रादुर्भूतत्वात्· तव सांब सु मस्तु स्यानां स्तुत्यतमस्त्वं श्रियाश्लेषो सी
महा तिश्रियं संपदं लघुं चारुशीलनं विचित्ररूपं तवजनिम लिंगाकृ प्रादुर्भावं मरुद्भिरभ्यर्चित ति
मुदाहरंति· तथा च श्रुतिः तव श्रिये मरुतो मर्जयन्त रुद्र यत्ते जनिम चारु चित्रमिति· अस्यार्थः
हे रुद्र चारुशीलनं चित्रं विचित्ररूपं ते यज्जनिम महालिंगाकृति प्रादुर्भावोस्ति तव तज्जनि

मत्रियो श्रियं लब्धुं मरुतो मर्जयितं अभिषेकादिना महालिंगार्चनं कुर्वन्ति इत्यर्थः ॥३१॥ ॥एवं भगवच्छब्दप्रवृ
त्तिनिमित्तं समग्रत्वरूपं षाड्गुण्यमैश्वर्यैकाश्रयत्वमुपपाद्याऽन्येषामपि सत्यादिगुणानां तदेकाश्रयत्वमाह।
क सत्यमिति। सति धर्मे साधु सत्यं वेदकर्तृत्वाल्लृणइत्युच्यते क्षमा कृतापराधसहिष्णुत्वं धृतिः स्वप्र
यत्नेन भूधरादिधारणं अ×वेदवाक्यं×धिष्ठितिः सर्वंतियमिनयाऽवस्थानं आत्मबोधः स्वसमवेतनित्य
ज्ञानेन स्वस्वरूपज्ञानं सृष्टिर्जगन्निर्मातृत्वं विरागो वैराग्यं तपो जगन्निर्मातृत्वेऽव्याहतः संकल्पः मतिः
कार्यालोचनं ईश्वरत्वं नियंतृत्वमित्येतानि त्वत्तो नावियन्त्यपक्रामन्ति। धर्मोऽणिमाद्यष्टकं कृपावित्यपि
त्वत्तो नापेतिन विमुज्यते गुणासंमते गुणत्वेन संमतेष्वपि यत्नेन भवति नास्ति किं तत् सर्वे गुणास्त्वय्ये
वसंतीत्यर्थः। तथा च पुराणवचनं नास्ति यद्यदकल्याणं तत्र ह्यस्य कदाचन। कल्याणानां सकलं चास्मि पर
मात्मा शिवायत इति। अत्र श्लोके विरागशब्देनामुष्मिकविषयवैराग्यमुच्यते। पूर्वश्लोके तु रागवि
रहशब्देनैहिकविषयवैमुख्यमुच्यते। अतो न पौनरुक्त्यं। ये ज्ञानवैराग्यसंबंध एव भगवच्छब्दप्रवृत्ति राम
निमित्तं षाड्गुण्यमिति वदन्ति तेषां मतेऽपि ज्ञानवैराग्याधारत्वेऽपि भगवच्छब्दो वर्तत एवेत्याह। नैवे २६
ति। वं कुश्रुता हि गुणा दृष्ट्वा ईश्वरान् ऐश्वर्यतोऽपि भगवतो न प्रवदंति यशसा महतो यशोऽधिका

कान्‌भगवतो न भव इंति वीरान् सार्वलौमान् सर्वस्यास्य मे ईश्वरान् तस्येश्वर इति सूत्रे ईशा सर्वभूमि
शब्दादीश्वर इत्यस्मिन्नर्थे लयप्रत्ययः अभिमतः संपन्नान् क्षितिपतीन पि भगवतो न भव इंति किंच
न्यादृशान् तद्गुणसहितान् वीतरागान् विषयाभिलाषरहितान् अज्ञानवतो ज्ञानवतः गुरूनान् भग
वच्छब्दवाच्यान् भव इंति अतो ज्ञानवैराग्याधारत्वमपि भवति एवेति हृदयं· भगवच्छब्दस्येश्वरवाच
कत्वे श्रुतिरप्यस्तीत्याह आथर्वणा इति· अथर्वणावेदमधीयाना अस्ते नामानि· महादेवादिनामानि
वन्ना अथ कस्मादुच्यते भगवानिति तल भवानिराकुः कुर्वंति· अग्निरित्यादिभिर्मंत्रैर्भस्मनो धारणं तथा त्रिपु
ण्ड्रधारणं वापि इत्यस्त्याश्रमं बुधाः। अत्याश्रमिभ्यः शांतेभ्यो वक्तव्यं ब्रह्मवेदनं· नाप्रशांताय दातव्यं नान्
कायकदाचन। इति पुराणवाक्योक्तलक्षणलक्षिता अत्याश्रमाधिकारिणां प्रत्युक्तायामत्याश्रमोपनि
षद्युपेक्षितस्य भगेशशब्देनाभिहितत्वाद्भगवच्छब्द ईश्वरमभिधत्त इत्याह अत्याश्रमेति· तथा च अत्या
श्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टमित्यत्याश्रमाधिकारिणां प्रतिवचनं अत्याश्रमोपनिषन्या
मध्येयाधर्मवहं भगेशमिति मंत्रोपनिषद्वाक्यम्भगेश्वरमाह· नैघंटुकमतेनापि भगवच्छब्दस्याभिधेय
इत्याह नैघंटुका इति· नैघंटुकाश्च भगवन्तं हृज्जपमु शांतिर्यदंति धातूनामनेकार्थत्वात्· वह्निभगुरि

ग रक्षोपं· माध्यंदिनि र्वह्निगुणांत्विग्गं नइत्यादावविधाऽपि वह्निः कांतिवचनोप्यसिधानवैशन्नि· नमस्तेअथे
स्तु भगवः अधीहि भगवो ब्रह्मेत्यादिश्रुतिष्वपि भगवच्छब्दः पूज्ये प्रयुज्यते· तद्भिन्नं तत्पदं प्रतिरूपकं भ
गवच्छब्दोयद्यपि श्रुतिषु निघंटुषु च पूज्यत्वे प्रयुज्यते तथापि वाङ्मनःकायनिमित्तस्तुतियागप्रणा
मलक्षणायाः प्रजायाः त्वच्छेषत्वस्य वर्ण्यमानत्वात् त्वयि मुख्यया वृत्त्या भगवच्छब्दो वर्तते ऽन्यत्र स
न्निकर्षवशाद्वर्तते इतिहृदयं· पूज्यवाची भगवच्छब्द निरूपणप्रसंगेन प्रजाया अपि महेश्वरशेषत्वमा
वां ह प्रजेति· अथवा यागादिनिबंधनायाः प्रजाया येतस्त्वच्छेषत्वमतः पूज्यवाच्यपि भगवच्छब्दस्त्वय्ये
व वर्तते इत्याह। प्रजेति। तनुष्टुहि मित्यादि तनुष्टुहीति प्रतीकवर्तमानं मंत्रेण वाङ्मनसकायनिबंधना
वाङ्मनश्च वाङ्मनसे· अचतुरेत्यादिना निपातः वाङ्मनसं च कायश्च ते निबंधनं कारणं यस्याः सा
प्रजा विहिता स च तनुष्टुहीति मंत्रः ऋक्संहितायामेवमाम्नायते· तनुष्टुहि यः स्विषुः सुधन्वा यो
विश्वस्य क्षयति भेषजस्य। यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्येति· अस्यार्थः यः स्विषुः
विष्णुसोमाग्निर्यं मसायकः तत्र श्रुतिः· गइ षुंस मस्कुर्वत अग्निमनीकं सोमं शल्यं विष्णुं तेजनमिति· राम
अनीकं वाणाली शल्यं मुख्यं शल्यं हृष्ठा य मनो निर्मितो भाणप्रस्थापितो येन न लोहपत्र इति १७

रिक्तंकाष्ठं·अथवाविष्णुमात्रसायकः।तथाचकर्णपर्वणि·बंधयित्वाशरंविष्णुमव्ययंयन्त्रवाहनं।शरंप्र
कल्पयामासविश्वकर्मानिशामनाइति·सुधन्वामेरुधन्वातथाचलिंगपुराणे·शैलेंद्रःकार्मुकंत्वासी
ज्ज्याभुजंगाधिपःस्वयमिति·अथवासंवत्सरधन्वा·तथाचकर्णपर्वणि।विचित्रमृतुभिःषड्भिःकृत्वा
संवत्सरंधनुः।कृतइतिअथवाॐकारधन्वा·तथाचशांतिपर्वणि·सकृत्वाधनुरोंकारंसावित्रींज्यांमहेश्वर
इति·वचनात्·विश्वस्यभेषजस्य·संसारव्याधिनाशकस्यज्ञानाख्यस्यसर्वौषधस्यस्नयतिइष्टे·त
मुतमेवहेअंतरात्मन्नूस्तुहि·अनेनवाङ्निबंधनाह्रजोक्ता·सौमनसायसौमनस्याय·महे·उत्सवेतमे
वरुद्रं·यस्त्वतमेवोद्दिश्यद्रव्यत्यागंकुर्वित्यर्थः·अनेनमनोनिबंधनाह्रजोक्ता·यागोनामद्रव्यत्यागः
अत्रमनएवहिकारणंअसुरंप्राणदातारंरादानेइत्यस्माद्धातोनुपसर्गेकः·नमोभिः·प्रणामैस्तमेव
हेवंदुवस्यपरिचर·धातवोऽनेकार्थाइतिअनेनकायनिबंधनाह्रजोक्ता·यद्यपिप्रयोगस्यमंत्रसमवेतार्थ
स्मारकत्वेनविधायकत्वंनास्तितथाप्यस्मादेवमंत्रवर्णाद्वाङ्मनःकायैरीश्वरंभजेदितिविधिरूपरिधा
रणाविधिवत्कल्पयितव्यः·तथाचप्रेताग्निहोत्रेश्रूयते·अथस्त्राग्नसमिधंधारयन्दक्षिणेनविहारमनुद्रवे
यज्ञं दुपरिहिदेवेभ्योधारयतीतितत्रपैठकस्यहविषोधस्तात्समंत्रकंसमिद्धारणंविधायतद्वाक्यशेषेणास

मिथोहविरूपरिधारणं दैवेकमैशिरीयश्रुतं तत्किमर्थवादः उतो परिविधिरिति संशयः तत्राधोधारणविधिस्ता
वकत्वेनतदेकवाक्यतायाललाभार्थवादइतिपूर्वःपक्षः अप्रसिद्धमर्थमनूद्यतेनस्तुतिमुक्ताउपरिधारणंतुनक्कापि
प्रसिद्धं अतःस्नायकताऽयोगात्वाक्यभेदमस्तुपगम्याऽपूर्वविधिःकल्पितः एवमत्रापिअप्रसिद्धार्थत्वेनविधिःक
ल्पयितुंशक्यतइतिबोद्धव्यं एवंपदाधिकरणातिःश्लोकेःश्लोकार्द्धसंभुतेः। ऐश्वर्यादिगुणत्वतुल्यहान्नंप्र
तिपादितं अशेषोपनिषत्प्रोक्तोपासनोक्तिपुरस्सरम्। भाविश्र्यांश्रतिजानीतेतस्यश्रोकामुपासनां॥
सर्वाश्रितिरिति। बृहदारण्यकादिभिःसर्वाभिरुपनिषद्भिरप्युपासनोक्ता। तथाचबृहदारण्यके सहोवाचगा
र्ग्योयएवासावादित्येपुरुषएतमेवाहंब्रह्मोपासइति सहोवाचगार्ग्योयएवासौचंद्रेपुरुषएतमेवाहंब्र
ह्मोपासइति बह्वृचारण्यकेच एतंह्येवबह्वृचामहत्युक्थेमीमांसन्तएतमग्नावध्वर्यवएतंमहाव्रतेछंदोगा
एतस्यामेतांदिव्येतंवायावेतमाकाशएतमप्स्वेतमोषधीष्वेतंचंद्रमसिएतन्नक्षत्रेष्वेतंसर्वेषुभूतेष्वेत
मेवब्रह्मेत्याचक्षतइति नारायणोपनिषदंपरिभावयाम उपपत्त्यानिरूप्यानुचिंतयामः। श्लोकाना
मथविंशत्यामीमांसान्यायपूर्वकं। याज्ञिक्युपनिषत्प्रोक्तोपासनंतत्क्रिलक्षणाम्। वाक्यमितिदह्रंविपा राम
प्मंपरवेश्मभूतंयत्पुंडरीकंपुरमध्यसंस्थं। तत्रापिदह्रंगगनंविशोकस्तस्मिन्यदंतस्तदुपासितव्यं। १८

इति यद्वाक्यं तेन दहरांतः हृत्पुंडरीकमध्ये उपासनामाह। यच्चोपसंहारवाक्यं अस्मिन्नुपासनायां ऋतं सत्यं
परं ब्रह्म पुरुषं कृष्णपिंगलं। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः इत्यादिरूपविशेषं सम
र्पयति इदमेव प्रतिपादयति। यथा अंतर्गतैरुपक्रमोपसंहारमध्यगतैर्वाक्यैर्निरूपितं होपयिका
न्निधेये स्यादन्तु गुणार्थैर्लक्षितं नवितव्यं इति वाक्यविदां मीमांसकानां प्रवाद उद्घोषः अयं न्यायः
दह्रमित्युपक्रमवाक्ये हृत्पुंडरीके अनिर्दिष्टनामरूपं तद्वस्तु ततः किंविधनामकं तद्वस्त्वित्या
कांक्षायां यो वेदांतस्तद्वस्तूपासितव्यमित्युक्त्वा ततः यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः। तस्य
प्रकृतिलीनस्य यः परः स महेश्वर इति वाक्येन वेदोपक्रमवेदसमाप्तौ कर्तव्यमित्यादयो वेदधर्मा
स्वाद्योपक्रमानुरोधेनोपसंहारवाक्यं नीयते किंतु नरिहोपक्रमोपसंहारगतमहेश्वरोपासनानु
रोधेन मध्यमानुवाको नेतव्य इति।३६। ननु मध्यमानुवाके नारायण उपास्यः प्रतीयत इत्याशं
क्य उपासनाविधिं तत्फलयोरदर्शनान्नैवमित्याह। नारायणस्येति। इह मध्यमानुवाके नारा
यणस्य यदुपास्यतया निधानं यच्चाप्यस्य फलं तदेतदुपास्यत्वमुपासनाफलं कथं। विज्ञोपल
क्षेन पश्यामि। ईश्वरोपासने तु ... दह्रं विपाप्मं परवेश्मभूतं इति उपासनाविधिवाक्यं न कर्म
णा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो

१९ विशंति। वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः। ते ब्रह्मलोके तु परांतकाले
परामृतात्परिमुच्यंति सर्वे इति ब्रह्मलोके परस्य ब्रह्मणः कल्पस्यावसाने सर्वोत्कृष्टामृतशब्दवा
च्यं महेश्वरं प्राप्य मुच्यंतीति मुक्तिरूपं फलं प्रोक्तमिति भावः ननु दहरं० तद्ध्यामिति वाक्यमेव
नारायणोपास्यत्वविधायकं किं न स्यादित्याशंक्य तदुपक्रमवाक्योक्तोपासने महेश्वरावरु
द्धे सति नारायणादिदेवतांतराणामनवकाश इत्याह उत्पत्तीति। उत्पत्तिशिष्टत्वं च दहरं० दह
रं विपाप्मं। यो वेदादौ इति तैत्तिरीयके तु पासनं वाक्यं तत्र शिष्टो विहितो लक्षणद्वयोज्वलामगुणसं
बंधो यस्य तदुपासनमामिक्षावद्वैश्वदेवयागस्येवमन्यगामि कर्तुं न शक्यं। तथाहि द्वितीया
ध्यायस्य द्वितीयपादे चिंतितं। गुणश्चापूर्वसंयोगे वाक्ययोः समत्वात्। चातुर्मास्ये श्रूयते तप्ते
पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति। दधिसंबंधात्क्षीरनीरयो विश्ले
षे सति यो घनीभूतः क्षीरांशः सामिक्षा तस्याश्च विश्वेदेवा देवता तत्र यन्न्यग्भूतं नीरं तद्वाजिनं तस्य
वाजिनो देवता तत्रामिक्षाद्रव्यकं वैश्वदेवदेवताकमेकं कर्म निभासति किंतु परितनेन वाजिभ्यो राम
वाजिनमित्यनेन ततः पूर्वस्मिन्नेव कर्मणि वाजिनगुणो विधीयते उतकर्मांतरविधिरिति संशयः तत्र २३
मा वाजेनोमिक्षा सा एषां विश्वेदेवानामस्तीति वाजिन इति व्युत्पत्त्या प्रकृतानेवानूद्य वाजिनगुणो वि

धीयतेसचामित्वयासहविकल्प्यतेनसमुच्चीयतेचेतिपूर्वःपक्षःउत्पत्तिशिष्टामित्वागुणावरुद्धस्य
कर्मणोगुणांतरेणाकांक्षाऽभावात्वाजिनस्यतत्रप्रवेशाऽसंभवेतस्यान्यथोपपत्तेर्वाजिनगुणो
वाजिशब्दार्थस्थिप्रकृतदेवताव्यतिरिक्तदेवत्वंकल्पयित्वाकर्मांतरेपर्यवस्यतीतिराद्धांतः तत्रयथावि
कक्रिया श्वेदेवदेवतायामुत्पत्तिशिष्टामित्वागुणावरोधेसतिवाजिनगुणस्याप्रवेशः एवंदहरांतरुपासनेमहेश्व
रावरुद्धेसतिनारायणादिदेवतांतराणामनवकाशः ननुपरमपुरुषोपास्यत्वाभावेमध्यमानुवाके
तस्यसंकीर्तनंव्यर्थमित्याशंक्योपासकतयातत्कीर्तनमित्याहः नासावितिउपासनाविधौविधेयेत्रि
विधउपासनमुपास्यमुपासकश्चेतितत्रासौनोपासनमक्रियारूपत्वात् उपास्यकथाहरतएववक्ष्यति
इतिशेषः उपासनाविधितत्फलयोरनुपलंभात्परमपुरुषस्योपास्यताहरतोऽपास्तेतिभावः न
स्मादुपासकतयापरिशेषसिद्धिः ननुपरिशेषस्यानुमानरूपत्वेनसंभावनामात्रबोधकत्वंअतःश्रु
तिमंतरेणाऽयमर्थोमिथ्याज्ञानमित्याशंक्याविशेषेपिश्रुतसामर्थ्यरूपंलिंगंप्रमाणमित्याह।
अंतरिति। पद्मकोशप्रतीकाशंहृदयंचाप्यधोमुखं। तस्यांतेसुषिरंसूक्ष्मंतस्मिन्सर्वंप्रतिष्ठितं
तस्यमध्येमहानग्निर्विश्वार्चिर्विश्वतोमुखः। तस्यमध्येवह्निशिखाअणीयोर्ध्वाव्यवस्थितः। नीवा
रशूकवत्तन्वीपीताभास्वत्यणूपमा। तस्याःशिखायामध्येपरमात्माव्यवस्थितःइतिः परमात्म

२७ नस्योऽतश्चावस्थितगिरा नारायणहृदयवह्निशिखामध्यावस्थितत्वबोधकवाक्येन शब्दात् तेपिपद्मांत
रनिरपेक्षलक्षणश्रुतिमंतरेणापि तल्लामर्थ्यरूपेणलिंगेन तदुपासकत्वं तस्यनारायणस्योपासक
त्वविहितमित्यर्थाद्वाकल्पनैकदेशत्वादित्याचार्यपादाः समर्थयामासुः अत्र यत्र सन्निधौ वाक्यशे
षोनविद्यते तत्र तत्र सामर्थ्यसिद्धेन विध्यंतेनैव निर्णय इति सार्वसंमतं तदुक्तं वार्तिके कीर्त्यते नस्यर्थे
वपायः प्रतिपत्तिहेतुस्तथैवसामर्थ्यमपिश्रुतीनामिति ईश्वरस्यनारायणहृदयवह्निशिखाम
ध्यावस्थानं नारायणस्योपासकत्वमन्तरेणानुपपद्यमानमित्यर्थापत्तिसहकारिणी तस्याः
शिखायामध्य इतिश्रुतिः तस्योपासकत्वं विधत्ते इति तात्पर्यं यद्यपि महेश्वरस्यनारायणहृदया
वस्थानकथनस्याप्रयोजकत्वान्नारायणस्योपासकत्वप्रतिपादने श्रुतेस्तात्पर्यमस्तीतिबोद्ध
व्यं नचात्मा नारायणः पर इतिवाक्ये परमात्मशब्दस्य नारायणवाचकत्वाच्छिखावाक्येपि
परमात्मशब्दस्य नारायणवाचकत्वं युक्तं अतस्तस्योपास्यत्वमित्यतआह। यस्येति परमा
त्मत्वं यस्य नारायणस्य हृदयोस्थितोसितस्यनारायणस्यपरमात्मतयाभिधानं युक्तं एकस्य
युगपदुपास्यत्वोपासकत्वाभावात् नचात्मानमहं जानामीत्यत्रैकस्यैवात्मनः कर्तृकर्मता राम
ववत्परमात्मनो नारायणस्यैकस्योपास्योपासकत्वभावः तथा सतिवाक्यद्वयेपिपरमात्म २०

शब्दस्य नारायणवाचकत्वात्सुखग्राह्यत्वाच्चेत्यत आह स्वेनेति हृदयपद्मशिखांतराले तिष्ठन्
स्वीयमात्मानं स्वेनात्मनोपास्य इति वचनं वंध्यासुतः स्कंधमारुह्य वर्त्तत इति वचनवद्वक्तुः स्वहास्यपदं
परिहासविषयं जनयति नारायणस्य स्वहृदयपद्मशिखामध्यावस्थानं माश्रयदोषप्रसंगात्तत्तु ला
च्यत इति भावः ननु यो वेदादौ स्वर इति वाक्यसहितेन ॐ विपाप्मामिति वाक्येन परमेश्वर उपास्य
इत्युक्तं तत्राधिकार्यपि ज्ञायां वेदांतविज्ञानेनेति वाक्येनाधिकारिणो यतात्मानो दर्शिताः फलाकां
क्षायां च परामृताः परिमुच्यंति सर्वे इत्यनेनोपासनाफलत्वेन मुक्तिर्दर्शिता अनेन यतात्मानो
मुक्तिकामा ईश्वरमुपासीरन्नित्यर्थः परिशिष्टं तात्पर्यतः किमपरमवशिष्यते यदर्थं नारायणहृ
दयादिकं संकीर्त्यते तत आह नारायणस्येति पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखं तस्यांते
सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितं यद्यप्युपासकपुरुषवर्णनमित्युपासनायां श्रद्धाहेतुरित्याह ना
रायणस्य हृदयमिति यथा देवासुराः संयत्ता आसन् स प्रजापतिरिंद्रं ज्येष्ठं पुत्रमपन्यधत्त इत्यत्र
अनुवाके पत्नीसंयाजांतानां इष्टीनामवसानं विधाय तदुपस्थापनार्थं एवं हि देवा अकुर्वन्निति विशिष्ट
पुरुषाचरणमुक्तं तद्वदिहापीति अविशेषेण श्रुतस्यापि हृदयादेर्नारायणसंबंधित्वं प्रकरणात्

गीकरणीयमित्याह। नारायणप्रकरणेति। नारायणप्रकरणोक्तं हृदयं तस्यैव नारायणस्यैव सं
बंधित्वेन वित्तुमर्हति अपरेषां नेति न ग्रहदृष्टांतमाह हृदयमिति मदवाचिका केदकमित्याग्निमासामान्येन वि
हितमुपासनं यदस्मिन्तत्संन्यासयोगाद्यतयः शुद्धसत्वा इति यथास्य प्रकरणे दृष्टं तथाऽतिलिंगाहि
तं संबद्धं दर्शपूर्णमासप्रकरणदृष्टाः समिधो यजतीत्यादिवाक्यविहिताः प्रयाजा दर्शपूर्णमा
सांगत्वं तद्वन्नारायणप्रकरणोक्तं हृदयं नारायण [illegible] संबंधी तथा अनेन प्रकरणलक्षणं प्रमाणमुक्तं न
नु नारायणस्योपासकत्वे नारायणपरं ब्रह्मेत्यादिवाक्येन तस्य परब्रह्मत्वादुपास्यधर्मविधानं न
संगच्छत इत्यत आह। ब्रह्मेति। पद्मनालः पद्मनालो यस्य अधःप्रत्यक्चेव बह्मवत्सीमनोक्तं इत्यत्राऽ
जितियोगविभागः कर्तव्यः पद्मनालदीर्घरात्रावधरात्रि = = = पद्ममिति योगविभागादिदं असौ पद्मना
भो नारायणः तद्भावनैकरसिकः तद्भावनायां तदुपासनायामेवैकस्यां रसिको ऽत्यंतप्रीतिमान् तत्व
इत्यन्यत्प्रावाल्यादयमेव विवेकरहितसमाधिल ध्यानावस्थायां तदैक्यारोपात्तदेकस्योपे पं
चमीत्वदैक्यारोपमयत्वं ब्यगरुडलावनमागरुत्मान्नमात्मानं मन्यमानो मंत्री गरुत्मानिति
तन्नारायणपरं ज्योतिरात्मा नारायणः परः नारायण परं ब्रह्म तत्वं नारायणः पर इति श्रुत्याप २२

रं ब्रह्मेति परं तत्त्वमिति परंज्योतिरिति चोच्यते· नारायण परंज्योतिः नारायण परं ब्रह्मेत्यत्र छांदसो वि
सर्गलोपः न केवलं नारायणोपनिषदि परमेश्वरोपासकत्वं किंतु नारायणपराशुगीतास्वपि इत्या
ह गीतास्विति· दिव्यं चक्षुस्ते ददामीति महेश्वरगोचरं महेश्वरविषयं मे योगमुपासनाफलं वैश्व
रूप्यमित्यर्थः निशामय पश्येति प्रसन्नो नारायणो योगजविभूतिविभावनायामीश्वरोपासना
द्वावैश्वरूप्यज्ञानाय शिवपदमीश्वरपदं प्रतिवाचष्टे· एवं हि तत्र वचनं· न हि मां शक्यसे द्रष्टुमनेनै
व स्वचक्षुषा· दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरमिति· हि यस्मात्कारणात् अनेन मांतु चव
क्षुषैव एव शक्यस्त्वर्थे स्वचक्षुषा तु विश्वरूपं द्रष्टुं न शक्नुयासि न तु मम से· अतस्ते दिव्यं चक्षुर्ददामि ए
श्वरं· शेषं स्पष्टम्· ईश्वरगोचरं योगमुपासनं तत्फलं वैश्वरूप्यं पश्येति मे योगमित्यनेन विष्णो
योगमुपासनं प्रतिकर्तृत्वमैश्वरमिति विशेषणलक्षणात् द्वितानेन परेण तस्य योगस्यैश्वरविषयत्वमुच्य
ते अतो विष्णोरुपासकत्वमीश्वरस्योपास्यत्वमिति भावः· ननु स ब्रह्मा स शिवः स हरिः सेन्द्रः सोग्नि
स्सोऽक्षरः परमः स्वराडिति वाक्येनोपास्यो देवः ब्रह्म शिव हरिरग्निरिन्द्र इति शिवादन्यः प्रतीयते
त आह त्वामिति· हे अंतकारे स शिवस्तुतिः स शिव इत्येवंरूपा स्तुतिः त्वद्वाक्यमथवा ऽदो वाक्यमि

ती स्यर्थः त्वामंतरेणान्यमुपासनीयं कथं विप्र ब्रवीति कुत इत्यत आह यदिति यद्यस्मात्कारणात् ब्रह्म
शब्दस्य ममत्विचाहारयोगात् वेदस्तत्त्वं तपो ब्रह्मेत्यमरसिंहवचनात् यद्यपि नपुंसकलिंगब्रह्मश
ब्दः परशब्दवाची तथाप्यधिकारीन्द्रादित्रयपाठादधिकारिप्रजापतिवाची । छांदसो लिंगव्यत्य
यः ब्रह्माद्यधिकारिवाची ब्रह्मादिशब्दैः स्थानसंबंधात् संहारकारिणि कालरुद्रे शिवशब्दमा
कुः अयं भावः क्रमः स्यदेशसामा २ समान २ न्यादिति जैमिनिसूत्रोक्तस्थानाख्यन्यायपाठल
रा ब्धात्प्रमाणादधिकारिवाचीब्रह्मादिशब्दस्थानपठितः शिवशब्दः कालाग्निरुद्राधिकारिणि गौण्या वृत्त्येति
इति तदुक्तौ । यन्न्याये श्रूयते सच्चिदानंदभगवग गम्यते । तत्किं न्याये श्रुतमिदमतो नाकं च हतमिति । कालाग्नि
रुद्रस्य संहारकारित्वं च । अन्या च महती शक्तिर्निहंति सकलं जगत् । तामसी मे समाख्याता कालरुद्र
स्वरूपिणीति कूर्मपुराणवचनादवगंतव्यं । ननु विष्णोरन्यं तु पश्यंति ये मां ब्रह्माणमेव च । कुतर्कमतयो
मूढाः पच्यंते नरकेष्वधः । ये च मूढा दुरात्मानो भिन्नं पश्यंति मां हरेः । ब्रह्माणं वा तथा तेषां भ्रूणहत्यासमं राम
मतमिति । तथा भवानहं च विश्वात्मन्नेकमेव हि कारणं । जगतोस्य जगत्यर्थे निर्दिष्टं नावयोर्व्यवच्छेदो । २२
त्वया यद्भयं यत्तद्वामखिलं मया । मत्तो विभिन्नमात्मानं द्रष्टुं महसि शंकर । योऽहं स सर्वं जगदेतद्

देवासुरमानुषं। अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः इत्यादि पुराणवाक्ये हरिहरयोरभेद प्रति
पादनान्नारायणोपनिषदि परमेश्वरोपास्यत्वं नारायणोपासकत्वं च वक्तुं न युज्यते किन्तु महेश्वरना
रायणशब्दाभ्यामेकमेव वस्तूपास्यत्वेनाभिधीयत इति वक्तुं युक्तं। तथा च सति पतिं विश्वस्यात्मेश्वरं शाश्व
तं शिवमच्युतं। इति शिवाच्युतशब्दाभ्यामुपास्यवस्तुनो मध्ये परामर्शश्चोपपद्यत इत्याशंक्य। य
त्त्वयत्तपतित्यादि विरुद्धधर्माक्रान्तत्वादुभयोस्तेजस्तमसोरिवाभेदेन भिन्नतात्वाह। विश्वाधिक
इति। त्वं विश्वाधिकोसि तत्र श्रुतिः विश्वाधिको रुद्रो महर्षिरिति। अयं तु मुरारिर्विश्वं। तत्र श्रुतिः विश्वं ना
रायणमिति। त्वं यज्ञेश्वरोसि तत्र श्रुतिः यज्ञपतिं धाः पृथिव्या इति आद्यो राजानमध्वरमिति। अयं तु नाराय
णं यज्ञं गृणाति। तत्र श्रुतिः यज्ञो वै विष्णुरिति। एष नारायण आद्या प्रकृतिः जगत्संस्थापनार्थं ईश्वरस्य
सात्विकी शक्तिः तत्र श्रुतिः वासुदेवः परा प्रकृतिरिति। हरमग्रुरारणं च। राजसी मामिका शक्तिः करोति स
कलं जगत्। तामसी मे समाख्याता कालरुद्रस्वरूपिणीति। त्वं चालिमित्रं तत्र श्रुतिः यः कारणानि नि
खिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येक इति। हे भगवन्नातः अत उभयोः कथं नु केन प्रकारेणाऽ
भेदः। ननु हरिहरयोस्तात्विके भेदे विष्णोरन्यं तु पश्यन्तीत्यादि पुराणवाक्यान्यनवकाशा
नि स्युरिति चेत्। मैवं हरिहरयोस्तात्विकाभेदे उपास्यत्वे समाने ऽपि हरः श्रेष्ठो हरेरजात्। भिन्नं वाथ समं वा
हीनं

२२ पिहरिणा ब्रह्मणा हरं· [illegible] ये पश्यंति सहात्तेतु पच्यंते नरकार्णवे· हरिब्रह्मादिदेवेभ्यः श्रेष्ठं पश्यंति ये
हरं। ते महाघोरसंसारान्मुच्यंते नात्र संशय इति हरिहरयोर्न्यूनाधिकभावप्रतिपादनेन भेदपराणि स्मृत
गीतावचनान्यनवकाशानि स्युरिति समानं· एवं तर्हि विनिगमनायां को हेतुरिति चेत् उच्यते· ब्रह्मवि
स्मृत ष्णुरुद्रेन्द्राः संप्रसूयन्ते कारणानि सर्वाणि श्रुत्यनुगृहीतानि गीतावचनानि स्मृत्यनवकाशाधिकरणन्याये
न प्रबलानि· तथाहि उत्तरमीमांसायां द्वितीयाध्यायप्रथमपादे चिंतितं। स्मृत्यनवकाशदोषप्रसंग
इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगादिति अस्यार्थः ऋग्वेदादिभिरग्निहोत्रादिधर्मो ब्रह्मणो जगत्का
रणत्वं च प्रतीयते· सांख्यस्मृतिस्तु प्रधानस्य जगत्कारणत्वं प्रतिपादयति· तत्र तया स्मृत्या वेदस्य
संकोचोऽस्ति न वेति संदेहः स्मृतेः प्रधानस्य जगत्कारणत्वमंतरेण निरवकाशत्वात् प्राबल्यं वेद
स्य तु धर्मेऽपि चरितार्थत्वाद्दौर्बल्यं अतः स्मृत्यनुसारेण वेदः संकोचनीय इति पूर्वः पक्षः प्रत्यक्षश्रु
तिलिङ्गकृतिभिरनुगृहीता मन्वादिस्मृतयो ब्रह्मकारणतामाचक्षते सांख्यस्मृतिस्तु मूल राम
हीनानि बलाद्बाध्येति सिद्धांतः एवमत्रापि मूलहीनानि हरिहरयोरभेदवचनानि श्रुत्यनुगृ २२
२ हीतभेदवचनैरेव बाध्यानीति· अथवा हरिहरयोर्भेदवचनानि विष्णुरादिदेवता आपि भेदेतत्क अन्नेदेन
लविशेषार्थं निःपास्या इत्येवं विधार्थप्रतिपादनपराणि तथा च पुराणवचनं। मम वैषा परमा
रीश्वरमूर्त्तिस्तेनो

मूर्ध्नि निरीयते समाकृत्या। सर्वभूतात्मभूतस्य शांता च हरिसंस्थिता। तस्माद्धेष महायोगी मद्भक्तः पुरु
षोत्तमः। अर्चनीयो नमस्कार्यो मत्प्रीतिजननाय हि॥ इति॥ ननु न ते विष्णो जायमानो न जातो देव
महिम्नः परमंतमाप इति श्रुतौ विष्णोर्माहात्म्यं कोपि न जानातीति श्रवणाद्विष्णोराधिक्यमिति चे
न्न जनिमत्सु रूपापेक्षया महत्त्वं न जनिरहितमहेश्वरापेक्षया। जायमानो न जात इत्युक्तत्वात्
इत्यलमति प्रसंगेन॥ ननु नारायणस्य विश्वात्मत्वे पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युत
मिति श्रुतौ नारायणस्य विश्वपतित्वं कथमाम्नायते अत आह। विश्वात्मेन इति। विश्वमात्मा स्वरूपं
यस्य तस्य विश्वात्मनो रथांगपाणेः स्तुतिकृत् विस्तुत्य अशेषनाथ वा इत्यादि येषु विश्वपतित्ववादः विश्वपति
त्ववचनं स्तुतिरूपैव संगच्छते मुख्यो न भवति॥ समो गच्छि स्वामित्यात्मनेपदं॥ छायातपयोरिवान्यो
न्यविरुद्धयो विश्वत्वविश्वपतित्वयोरेकत्र समावेशासंभवात् यजमानः प्रस्तर इतिवत्॥ विश्वस्य ना
रायणस्य विश्वपतित्ववादः स्तुतिः किन्न स्यादित्यत आह। विश्वस्येति विश्वस्य परंतु नारायणस्य
अथ कार्त्स्न्ये निः॥ मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथो अथ इत्यमरः विश्वनयावलिधानं गुणगणनिकष
हेतुः पहास्येरिवास्यापत्त्ये उच्येति ग्रहणात्तैः स्यात्॥ गुणपुञ्जाश्रितापकर्षकारणं सकलगुणाय स्तुत
चेनात्ते॥ न समर्थ उत्कर्षहेतुनि स्तवनमपकर्षहेतुनि निंदेति वचनात्॥ न चेश्वरस्यापि सर्वो विरुद्ध इति

२५ श्रुतौ विश्वत्वं श्रूयत इत्यत आह। विश्वमिति। हे महेश्वर। विश्वं सर्वानधितिष्ठतीति। विश्वास्मिन् वर्तन्ते अ
धिशीङ्स्थासां कर्मेति कर्मसंज्ञायां द्वितीया। इति हेतोरागमो ऽपि सर्वो वै रुद्र इत्यादि श्रुतयस्त्वे
विश्वात्मतामुपचरंति। उपचारेण लक्षणया प्रत्याययंति। विदितवेदरहस्यशीला: विदितानि ज्ञा
तार्थानि वेदरहस्यान्युपनिषद्वाक्यानि शीलयंति उपक्रमादिषड्विधतात्पर्यलिंगैर्विचारयंतीति
ति विदितवेदरहस्यशीला: शीलिकामिति इत्याचरित्येण इति वक्ष्यमिति शीलनेराः पंडिता
विद्वांसो जानंति। मूढमतयस्तु वेदरहस्यार्थपरिशीलनाभावादीश्वरस्य सर्वाधिष्ठातृत्वमजा
नंतः पुरुष एवेदं सर्वो वै रुद्र इति वाक्ये प्रतीयमानं विश्वत्वमेव रुद्रस्य संजानंति। तस्मा
त्पानंदत्वात् आविर्भावात् स एष इह प्रविष्ट आनखाग्रेभ्य: एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यते
त्यादिश्रुतिषु। शिवेनाधिष्ठितं सर्वं जगदेतच्चराचरं। इत्यादि पुराणवाक्येषु च ईश्वरस्य वि
श्वस्मिन् प्रवेशस्मरणात्सर्वो वै रुद्र: सर्वं खल्विदं ब्रह्म। ब्रह्मैवेदं सर्वमित्यादि श्रुतिवाक्येषु
सर्वशब्दोपि तत्प्रविष्टमीश्वरं लक्षणया बोधयतीति भाव: कात्यायनस्तु हे महेश्वरस्य
सर्वाधिष्ठातृत्वमभिधाय तत्प्रमाणत्वेन सर्वो वै रुद्र इति श्रुतिसमानार्थमारुद्रो ह्येवैतत्स राम
र्वमिति श्रुतेरुदाहृतत्वादीश्वरस्य सर्वाधिष्ठातृत्वमेव न सर्वात्मत्वमित्याह। तुभ्यमिति। सर्वदे २८

ग.ले शास्त्रियार्थदर्शनशीलः कात्यायनो मुनिः तं तमर्थं हि शिष्यान् हि सर्व[illegible]मातिष्ठते अधिष्ठायास्थित
वते तु स्यं सकलकर्मसु लौकिकवैदिकसर्वकर्मसु नमो विदधत् नहीं सुत्रीयन हीमासिमं त्रयतेन
मोरुद्राया कु मः स्वस्तिमासंपारयेति गिरिमासिमं त्रयतेन मोरुद्राय गिरिषदे स्वस्तिमासंपार
येति एवमन्यत्रापि नमो रुद्रायेत्येवं ब्रूयात् इति वाक्ये नमस्कारं विदधतु कसमर्थनायेश्वरस्य सर्वाधि
ष्ठातृत्वसमर्थनाय इमं सर्वो विरुद्र इत्येतत्समानार्थं सिद्धान्तु वाकं रुद्रास्यैवैतत्सर्वमित्यनुवाक
मुदाहरति स्म नमः स्वस्तिमां गतस्य संपारय सम्यक्पारं नयेति तस्यार्थः रुद्र एवैतत्सर्वं हि सर्वा
धिष्ठातृत्वमर्थः यो रुद्रो भगवानिति मंत्रेचस्यैष एवायमर्थः उक्तं नारायणोपनिषदर्थमुपसंहरति·
स्तानमिति· यदहरं हृदयाख्यं यदुपासनस्थानं यान्योपास्तिः यश्चोपासकः परात्परतयाधिकन्यूनतावे
नविविधावकु विधा सा या विभूतिः विषमने श्रारभ्यमुपासितव्यमित्युपासनं सहस्रशीर्षमित्युपास
श्र कः संस्तेनोध्यरनाहात्म्येन स्तूयमानं ब्रह्मादिरूपा विभूतिर्येविहादाविस्मुपासितव्यंचाहेत्यर्थः
ननु च घोषोपनिषदिश्वरजनितपाहन परानंतं हि नारायणोपनिषदुपदेशः संगच्छत इत्यत आह
यन्नात्मनेति· यथा सहस्रशीर्षेति पुरुषदैवतं सूक्तं नारायणाख्येन नारायणाख्येन श्रभिरनाहृहं शा

शेषइत्युक्तिः इति हेतोरत्रापदिष्टं तेन नारायणेनापदिष्टं यथोक्तं सहस्रशीर्षः सोऽशनारायणः
पुरुषोनुष्टुप्छन्द इति तथा हंतकारे सर्वतः प्रतिपादयित्री प्रतिपादिका अस्मा वस्तु पनिषद्यज्ञात्मना
नारायणेनर्षिणोपदिष्टा अत एव तामुपनिषदं नारायणोपनिषदित्याहुः एवं नारायणोपनि
षदुदीरितोपास्यत्वमुक्त्वा तस्याः याइश्वरस्य ब्रह्मजनकत्वं श्रुतेरस्तीत्याह यो देवानां
प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः । हिरण्यगर्भं पश्यत जायमानं स नो देवः शुभया स्मृत्या सं
युनक्तिः यस्मात्परं नापरमस्ति किंचिदिति एषा महोपनिषत्सुराणां प्रथमं हिरण्यगर्भं ब्रह्मा
णं पुरस्ताज्जायमानं पश्यत पश्यंतीति वर्तमाने प्रयोगो मुमुक्षुभिः पश्यतीत्यर्थः तिङ्व्यत्ययः
छांदसः स देवः शुभया ब्रह्मणो विष्णुजनयितेति स्मृतिशब्दानाती तया स्मृत्या संयुनक्तीति श्रु
तेरर्थः तथापि एनं ब्रह्माणं नारायणात् जिजनत् एवं नारायणो जिजनो जन्मभूमिर्यस्य कुलेष
जिजनो जन्मभूम्यामित्यमरः कतिचित्कं हाः स्वयमज्ञाः मंदाः सरोगानि सन्ति ग्रीस्वत्स्यत्सु तापदुरत्नय
च आइतियाहवः तत्र ब्रह्माणि सर्वतः प्रस्तुतिं शंसति प्रविश्य ब्रह्मणो देह सर्वार्थे हादहशसिः । तद्विस्मितः राम
कमलाकांतो निजगाम त्रिधमपात् । सहस्रशीर्षा पुरुषः कुनेब्रह्मारामं प्रवीत् विध्येत्वमपिम २५

देहं प्रविश्याशु विलोकय· चराचरात्मकान्लोकान्स देवासुरमानुषान्। ततोविरिंचिर्लिंगवानुदरंक
मलापतेः। प्रविश्य सकलान्लोकान्ब्रह्माण्डान्विस्मितो विधिः। नापश्यन्निर्गमद्वारं विहितं चक्रपाणि
ना· ततोस्य नाभिचक्रस्य नालमागमविंदत· निर्गतस्तेन मार्गेण ब्रह्मा ब्रह्मविदांवरः इति· नमस्तेता
तिपरत्वात्किंचिदुत्पद्यते। गते बहुतिथे काले समरक्रोधमूर्च्छितः प्राणात्मकः समुद्भूतो ललाटे
ब्रह्मणो हरः इति स्कंदोक्तार्थं ब्रह्मपुराणवचनोक्तमजानन्तो नारायणनाभिकमलाद्विनिर्गममात्रे
ण ब्रह्मणो नारायणादुत्पत्तिं वदतो ब्रह्मणो ललाटप्रादुर्भावमात्रेण तत्रोत्पत्तिं वांत्याशंस
न्तीति भावः। प्राणात्मकः समुद्भूतो ललाटे ब्रह्मणो हर इति स्कंदोक्तार्थं ब्रह्मणः पुत्रो ललाटे प्रसुरूजि
तद्व्याख्यावाक्योरल्पबुद्धीनामीश्वरस्य ब्रह्मोत्पत्तिभ्रमो मा भूदिति ब्रह्मणा ईश्वरोत्पत्तिं निराचष्टे।
मध्ये ललाटमिति· अरविंदस्तु यो ब्रह्मणो मध्ये ललाटं ललाटमध्ये पारे मध्ये षष्ठ्या वेत्यव्ययीभावः
ललाटमध्ये चलवान् लोचनदहने इत्येष भवतः कोऽनिरूपयिता हः निरूपयितुं न भवतीत्यर्थः कथं न भवती
त्याशंक्य एवंविधप्रादुर्भावस्य भवतः सर्वत्रैसंभवात् इत्याह योगेति। योगाधिरूढमनसो मा
हेशो मनुष्यमात्रस्यापि कृत्यहृत्कंठब्रह्मरंध्रोत्ताल्वादिमध्यात्मलक्ष्यपंचकस्थानेषु त्वदलि

तत्र श्रुतिः।
अथर्वशिरसि
हि प्रजापतो
हर आसीदि
ति

२६ अक्षिस्थानेषु तथोपलंभोन· सर्वस्यापि योगसमाहितमनस्कस्यावोपलब्धः विद्यत इत्यर्थः एतदेव महो
पनिषद् देवानां गुह्यमिति श्रुतिवाक्येन नारायणोपनिषदाम् इत्यनुक्तं तत्रकारणमाह ब्रह्माणीति ॥४३॥
शिवसंभा हितानां जीवानां वा जीवनहेतवः प्राणभूता इत्यर्थः सद्योजातं प्रपद्यामि सद्योजाताय वै नमो
नमः। भवेभवे नातिभवे भवस्य मां० नमः। वामदेवा० नाय नमः॥ अघोरेभ्यो० रुद्ररूपेभ्यः तत्पुरुषा०
य विद्महे· ईशानः० वोम्। इति पंचब्रह्माण्येव शिवमंत्ररूपाण्यनयोस्यां महोपनिषदि रुद्रेषु रुद्राध्याये
षु तुरण्यमत्तराणां पंचकमिव पंचाक्षरमंत्रानुप्रविष्टा इतिमहस्यवादः पंचाक्षरानुप्रविष्टं देवा रुद्रै
कादशिनोपावनत्वं· तथाचपौराणिकाः यस्मात्पंचाक्षरी विद्या रुद्रैकादशिनीमध्यगा पावनी स शतरुद्रिय मध्यगा।
पा वंद्यानां रुद्रैकादशिनीतत इति· ईशानः सर्वविद्यानामिति पंचब्रह्ममंत्रगतेन ब्रह्माधिपतिरिस
नेन पदेन ब्रह्माधासावधिपतिरिति निषादस्थपतिवत् कर्मधारय समासः अयमीश्वरस्य ब्राह्मण
त्वे ब्राह्मण आधिपत्य प्रतिपादनेन सर्वेषां ब्राह्मणानां कस्मात् ब्रह्मणोधिपतिरीश्वरो देव ब्राह्मणः
स्वामिने वन्यतिसंबन्धु स्तत्प्रकरणः पंचब्रह्ममंत्रार्थमाहा विद्येश्वर इति· त्वं विद्येश्वरोसि अष्टादश वि राम
द्यानां कर्तासि· तथा च पुराणवचनं। अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनां। अधिकर्ताकवि: २६

साक्षाच्छूलपाणिर्महेश्वर इति॰ एकस्त्वमूर्ध्वपतिरासि ब्रह्मर्षिर्ब्रह्मणोधिपतिस्त्वित्॰ अपरं ब्रह्म इ
ति॰ यद्यप्येतत्कारणात्पदति ब्रह्मणस्तथाधिपत्यं॰ ब्रह्माधिपतिरिति कर्मधारयसमासात् अयमो
नेश्वरस्य ब्रह्मण ब्राह्मणाधिपत्ये प्रतिपादके शिवोऽस्य ज्ञानमसिद्धेः। ननु वेदस्तावन्तपो ब्रह्मेत्य ग्म
मरसिंहवचनाद्ब्रह्मणो वेदस्याधिपतिरित्यर्थसंभवात् ब्रह्माधिपतिरित्यनेनेश्वरस्य कथं ब्राह्मणप
वेदाधिपतित्वनिश्चय इत्यत आह। विद्येति। विद्येश्वरत्वपुनरुक्ततया ईशानः सर्वविद्यानामित्ये
तदुक्तविद्येश्वरत्वपौनरुक्त्यप्रसंगात् ब्रह्माधिपतिरित्यनेन वेदाधिपत्यं न वाच्यं॰ ननु विद्याधिपत्यवे
दाधिपत्वयोः कथं पौनरुक्त्यमित्यत आह। अयमिति। हे महेश शशलेशः प्रविभज्यमानाः इत्थं ह्रियमाणा वेदाद
माणा विद्या अयमेव वेदो भवति तथा हि सरितः इत्थं भूतानि स्रोतांसि सरित्त्वं भवंति किं स्रवंत्येवेत्य
र्थः इति विंशतिसंख्याकैः श्लोकैरीश्वरत्वं हताणं। यानि केनुपनिषत्प्रोक्तोपास्यत्वं प्रतिपादितं॰
गायत्रीवाच्यतोपाय उपोद्घातनतयायनतः। आदित्योपनिषद् ज्ञानानामन्त्ररं। आदित्यमि
प ति॰ ऋग्यजुःसामनिधानकोशे॰ ऋक् यजुश्च ऋग्यजुषं अचतुरेत्यादिना निपातनेन ऋक्सामचऋ
ग्यजुषसामनी॰ तानि निधीयंते अस्मिन्निति निधानं तत्कोशे बिंबमंडलेऽस्थितमादित्यं यः पुरुषा
धितिष्ठति पाप्मादिनातिष्ठादेशः आदित्यो वा एष एतन्मंडलं तपति तत्र ता ऋचस्तदृचा मंडलं स ऋचां

रिति ०एषभूतानामधिपतिः एषाउपनिषत् एषशङ्खेनसालिनयाअग्निनयः प्रसन्नवल्लिहेशः पुरोवास्थितौ
२७ हस्ताद्दर्शयितीवभूताधिपस्यवचनेनभूताधिपतित्वप्रतिपादकेननाम्नासंज्ञयेत्यर्थः शशास्तुवाच
आचष्टे तत्प्रसंगान्नमोहिरण्यबाहवइतिवाक्यस्याधमाहात्ऽ भूताधिपतिरुक्तः इति ऐश्वर्यश्च
रः हिरण्यपतिरुक्तः तत्रश्रुतिः हिरण्यपतयइति हिरण्यपतित्वमीश्वरस्यसंभवतियस्यैतस्मा
परस्माद्धस्तागिरयस्सहसुमेरुणा हिरण्मयावसूधुर्यस्यवीर्याद्दिङ्मपिहिरण्मयमितिः श्रुतिश्चि
रेषहिरण्यबाहुरुक्तः नमोहिरण्यबाहवइतिबाहुशब्दोऽंगान्तराणामुपलक्षणं हिरण्मयसर्वा
वयवः तत्रश्रुतिः यएषोऽन्तरादित्येहिरण्मयः पुरुषइति छान्दोग्येचहिरण्यश्मश्रुराप्रणखात्सर्वएव
सुवर्णइति यएषोंऽबिकापतिरुक्तः अंबिकापतयइति उमापतिरुक्तः उमापतयइति एवंविधं
त्वांसाक्षात्कर्तुमीश्वरोदेवइतिकल्पयित्वाऽच्छरश्मेः सूर्यस्याधिदैवतं अधिष्ठातारमाह तदर्चनविधौ हे भगवन्
सूर्यपूजाकरणोवयमतिज्ञो आदित्योवाएषइत्याद्यनुवाकोक्तमर्थं संगृह्यदर्शयति योमंडलमिति ॥
आदित्यमंडलं तपतियश्च तदन्तरात्माऽग्निरः अनयोः सूर्यतदन्तरात्मनोः विभूतिर्नवेति विघतेएतदज्ञा
नानोविद्वान् यत्फलमश्नुते तत्सर्वमित्यादित्यानुवाकेक्रमेणयथावत्कथितं तथाचक्रमेणाश्रुत राम
यः आदित्योवाएषएतन्मंडलंतपतीतियएषोऽन्तरादित्येहिरण्मयः पुरुषइति आदित्योवैतेजओ २७

जोबलमित्यादिब्रह्मणः सायुज्यमित्यंतानुवाकस्य एवमाहित्सोवा एष इत्याद्यनुवाकस्य तात्पर्यम
भिधाय एतस्मादेशात्स्थानमेवसावित्रीमंत्रस्थानेकारणमित्याह मानामेति ॐ भ्यद्यादित्योवेत्यादियेहा
तप्रदेशादत्त्पमस्यस्य अरवि ब्रह्मवेदांतनाकर्ययजाळ्मालभ्रामनामशद्वः आकाशस्य नाम आकाशस्य सं
ताव्यक्तो धोपगमकुत्स्नं न इत्यमरः मा प्रकाशीत्वबलिस्यर्थः इमं प्रदेशमाहित्योवेत्यादि येहांतप्र
देशं अध्यापिता अथर्वविबोधपर्यंतं मध्ययनं कारिता विद्वांसः स्माहितिमंत्रविदस्तत्स्सविनुवरेण्यमि
तिगायत्रीमंत्रविदो भवंति किं च तेषामस्य गायत्रीमंत्रस्यार्कं सविता सूर्यो वाच्यः किं वा तत्सवितुर्व
रेण्यो भवानिति वितर्कयितृइ अयं विचार एव नो देति आदित्योवेत्यनुवाकानुसंधानेनेश्वरस्य सूर्यां
तर्यामित्वादिश्वपतिगायत्रीमंत्रेपितदंतरात्मेश्वरएव प्रतिपाद्य इति निश्चयो भवतु त्स्यर्थः गायत्रीमं
त्रपदार्थविचारेपि ईश्वरस्य गायत्रीमंत्रप्रतिपाद्यत्वं प्रतीयत इत्याह तास्वंतमिति एषः तत्सवितुर्वरे
ण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयादिति मंत्रो तास्वंतं न विषयीकुरुते प्रतिपादयति किं स
च्चिदेवतत्त्वां वक्तुं शक्नोति तत्र हेतुमाह यस्मादिति यस्मात्कारणात् अयं भर्गशब्दस्त्वयि निरोहतिति निरूढो
भवति हरः स्मरहरो भर्ग इत्यमरः यस्मात्सर्वप्रितावोधं कारयतीत्यादि श्रुतिष्वाम्नायसे ननु केचिदिमं
मंत्रं सवितृपरत्वेन व्याचक्षते यः सविता नोऽस्माकं सर्वजां धर्मादिविषयां बुद्धिं प्रचोदयात् प्रेरयेत्

सवित्राभ्यनुज्ञातो हि सर्वं कर्म करोति सविता प्रसवानामीशे इति श्रुतेः। तस्य देवस्य सवितुर्व
२५ रेण्यं वरणीयं भर्गः पापानां तर्जनं तद्रूपं धीमहि ध्यायेम हि न तच्छब्दश्रुतेर्यच्छब्दो ध्याहृतव्यः यत्त
र्वे ध्येयं तदित्यर्थः तथा च तेषां वचनं यो देवः सविता स्माकं धियो धर्मादिगोचराः। प्रेरयेत्तस्य यत्त
गत्तद्वरेण्यमनुपास्महे इत्यत आह मातेति द्विजं तकारे अंतकरिपो अयं भर्गशब्दः सांतो यदि अनुनिर्ग
तुन्नू प्रत्ययांतत्वेन सकारांतः स्थित्वे यत्तत्पदद्वयं यत्तत्तद्धितिपदयोर्लिंगत्वेन पुंल्लिंगनपुंसक
लिंगत्वाद् नन्वयि परस्परान्वयरहितं अस्मिन्मंत्रे श्रूयमाणमपि तत्र सत्त्वेऽपि लिंगसमानलिंग
मुक्तयमन्यद्विशेष्यमपेक्षयत्वाकांक्षितयोग्यसंबंधसमानलिंगपदाश्रवणात्साकांक्षमेव
यत्तत्पदद्वयं भवति छेत्यर्थः अतएव पक्षो ऽसमंजसो ऽसमीचीनः भर्गशब्दस्य सकारांतत्वांगीका
रेणाप्यदिरत्वेन पक्षो ऽनुक्त इति भावः ननु भर्गशब्दोऽनुप्रत्ययांतत्वेन सकारांतत्वे न सवितुर्व
कः त्रिलिंगत्वादिर्नित्यमित्याद्युक्तानोनित्य रक्ता इत्यन्ता याममेवोपपद्यते इत्यत आह शब्दस्तु
नेरिति अमुनिघाघत्रिवायपदांते सति त्रिलिंगत्वादिर्नित्यमित्युक्तानस्वरस्तुनयथानुक्तं परांतत्वेग राम
म्हस्यानुक्तं तत्रायामिव घत्रं तत्रायामनिषु ... त्वमिति ननु लुप्यते संसारदुःखमनेनेति २८

कर्तर्येव घञ् न सिध्यति । अकर्तरि च कारके संज्ञायामिति तद्विधानादित्यत आह व्यत्यस्तेति । व्यस्त
सकारकं विपरीतकारकं भर्ग इति मैत्रायणश्रुतिपराहतसांतत्वाद्भर्गो देवस्य धीमहि । सविता
वै देवः यस्य भर्गाख्यां तं चिंतयामीति मैत्रायणश्रुत्या भर्गाख्योऽस्य कारांतत्वोपादानात्पराह
तो निराकृतः सांतत्वात् सकारांतत्वं यस्य तत्तथा इदं भर्गपदं घञंतत्वं मन्वेमि । मैत्रायणश्रुतिनि
षेधितकारकव्यत्यासमंगीकृत्यानुवर्तनं परित्यज्य घञंतत्वमंगीकर्तव्यमिति भावः । अस्या
मैत्रायणश्रुतेरर्थमाह । मैत्रायणश्रुतिरिति । हेतुरारः असौ मैत्रायणश्रुतिः तद्धितिगायत्री
मंत्रं प्रकृत्य भर्गं चिंतयंतं भर्गाख्यं चिंतयामीत्यनेन विचिंतनीयमभिधाय को भर्ग इति
कांक्षायामेव प्रश्नो भर्गाख्यो भूत्वा हि … परिगणनवाक्ये … स्य रुद्रस्य भर्गपदगोचर
तां श्रुत्वा भर्गपदं सांतं प्रतिपादयति । भर्गपदस्य सकारांतता निराचष्टे । तत्र च कारि आलशं
पि भर्गशब्दस्य सांतताबो निराकृतेत्याह सांतमिति । तत्र च कारिणः कः सवितासावित्युपी
पक्रम्य तस्यापरः प्रथमः पाठो द्वितीयः पाठो भर्गमयः इति … लक्षणवाक्यमामनंतीति । तदपि

२५ जगदिदं सांतं वक्तुं नैव ददाति· सकारांतत्वेन वक्तुं न समर्थ इत्यर्थः। तत्र हेतुमाह। प्रश्नेति· प्रश्नोत्तर
क्रमनिरूपितं सर्वपाहं कस्य विता का सावित्रीति प्रश्नः तस्या एव प्रथमः पादस्तु वः क्रमनिरूपितः
प्रतिपादितः सर्वपापहोयं तस्य तत्र आम्नातं अथ द्वितीयः तस्या गायत्र्याः पादः जगन्मय इति ब्रवीति·
सप्तहि सांतः स्यात् जगन्मय इति तस्या इति तात्पर्यं· एवं जगच्छिष्टस्याकारांतत्वं तु पदपादे गाय
त्रीमंत्रपदानामर्थमाह। जगदिति· यो स्मदीयाधियः प्रचोदयादिति धीमहि तच्छब्दस्य नपुंसक
लिंगविनिमय्यापि परिणामं कृत्वा घटना क्रियाकारकयोजनायं प्रतिपादितेति एतदपि मं ने
योजनद्वयमित्याह। वाच्यस्येति जगद्वाच्यस्य जगदिदवाच्यस्य सवितुः स्वपदासन्निधानं सवा
मं चकत्व जगच्छिष्टात्सन्निधानं तत्प्रभगाख्यं किमपि परंधामेति सांबस्तुतिवाक्यानुरोधश्चेति· प्रयो
जनद्वयं· तदुत्तरमिति मंत्रोपनिषद इत्यनुमेवार्थं प्रतिपादयतीत्याह। त्वमिति· तदुत्तरं तत्सवि
तुर्वरेण्यं प्रशाचरस्मात्प्रसृता पुराणीति मंत्रोपनिषच्छब्दस्वाभेवतादित्यस्या ऋचः प्रति राम
पाद्यमर्थं ब्रवीति· तुशब्दस्तु मंत्रानुकरणार्थः· ननु सागत्वेऽस्या ऋचः कथं सावित्रीति व्य २९

६७

पदेशस्तथाह लौगाक्षिः अयं तत्सवितुरिति मंत्रो लौगाक्षिमते देवतास्ये त्यर्थे सास्य देवते त्य
णेरित्यग्देवताकः सावित्रत्वात् सवितृदेवताकत्वमपि गाहले एव आम्नायेष्वेव हि यस्मात्कारणात्
मंत्रविदः तत्तत्पदार्थवशेन तत्तद्देवतावाचकपदसंबंधवशेन मंत्रांतरदेवतांतराणि पि पृथंति· एक
स्याप्येवं ऋचो नैकदेवतावाचकपदसंबंधादनेकदेवताकत्वं ब्राह्मणोक्तं दर्शयति· अपीति· अर्द्धदेव
वतां विश्वेदेवस्य पत्नीस्वसाचेपोनाम ऋषिः अनुष्टुब्व्यापंक्तिरिति आग्निधानं विश्वेदेवस्येत्यस्या
ऋचो विश्वेदेवदेवताकत्वमुक्तं तथापि मंत्रवाच्या देवतेति नैरुक्तवाक्यादर्कदेवतत्वलीमिरुक्तं अ
र्कदेवतत्वलीमपि सवितृदेवताकामपि· विश्वेदेवस्य नेतुर्मर्तो वृणीत र्कदेवताकत्वमित्यत्र तस रव्यं·
विश्वोरायइषुध्यसि द्युम्नं वृणीत पुष्यस इति अयं विश्वदतिशाद्दे नवेश्वदेवी विश्वेदेवदेवताकामन्त्रे द
तिपदेन पित्र्यः धिदेवताकां पुष्यस इतिपदेन पौष्णं सषदेवताकामामनामोधीमहे· तथा च यजुर्वेद
ब्राह्मणवाक्यं· विश्वेदेवस्य नेतुरित्याह सावित्र्येतेन मर्तो वृणीत सख्यमित्याह पित्र्यदेवत्येतेन
विश्वोरायइषुध्यसीत्याह वैश्वदेव्येतेन द्युम्नं वृणीत पुष्यस इत्याह पौष्ण्येतेन सा वा एषर्क् सर्वदे

दृष्टेत्येतिएताद्दशानि का निदर्शनानि कतिनामनसंताव्यंते नामआकाशस्य संलाव्येत्यमरः क
ने तिचित्संताव्यानीत्यर्थः ॐ नैवन्यायेन तशब्दाशयथा च यवशेनापि तत्क मंत्रमंत्रविनियो
३० गः क्रियंतद्दृष्ट्या एमतिश्रुतिगिरां वेदवचसां एषा गतिरयं न्याय इति निराजिन यस्तु तत्रुहार्व
नविधौ शन्नुपक्रमेण शेशाद्दुउपक्रमः आरंभो यस्य तेन शंनो देवीरभिष्टय इति मंत्रे गाशानैश्वर
स्य कुत्र स्य शाद्दू सहितेन उ कुध्यस्वाग्न इति मंत्रेण कुध्यस्य मूर्जां स्मरंति· तथा च याज्ञवल्क्यः।
आद्यं छन्दोनुदेवमग्निर्मूर्धा दिवः ककुत्। उद्बुध्यस्वेति च ऋचो यथासंख्यं प्रकीर्तिताः। इह
स्य ते अनियदर्शस्य द्वेवाततत्पर श्रुति। शन्नो देवी स्तथा मंत्राः केतुं कृण्वन्नकेतव इति· ईश्वरवा
चकेषु जउ मधुवैदिक मंत्रेषु सत्स्वपि गायत्र्या ईश्वर प्रतिपादनेऽग्नीसारत्वं हेतुरित्याह। आ
म्नायमिति। ॐ ग्य कुर्वसाम प्रकार मान्नायं वेदं विचिंत्य अदृष्ट प्रकारांतरेणासारं उल्कृष्टं ना
गं समुद्धृतवता परमेष्ठिनापि अपिरेवार्थः परमेष्ठिनेव त्रिपादयं मंत्रः उक्तार्थं मनुवचन सम्मतिं राम
दर्शयति· यथेति। यथोक्तं मनुना। त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्। तदित्यृचोऽस्याः सावि ३०

अनलोग्निः सकलं हविर्दिहा तु ग्रीकरोतु न सकलं सोमादिकं हविः तेत वस्यमितिशोषः लागडुधः लागंकरं तोग्धिय्र क्षातीतिभृग

त्रिभ्रातपरमेष्ठी प्रजापतिरिति· आथर्वणस्याद्यत्रैवांत नघिवात्रिस्य इत्तुक्तं· एवं पंचदशश्लोकैः सोमो

द्यातं महेशितुः। गायत्रीमंत्रवाच्यत्वंलक्षणांसु निरूपितं। ओ हृशिक क्रमश्रासं क्रतुशोषिक्

लक्षणां। श्लोके दशदशसंख्याकैरूपपाद्यतिस्फुटां त्विति· लागडुधः इत्तुशालिकादिः उहः क मौल्क

राहो तुश्चेति उहेः कप घकारश्चांतादेशः वलिंकरै हे उधधिअत्रदृष्टांतमाहरानइति· शुल्कशालिका हरत्तु

हि गृहीतः क्रोरात्तः एवमनलगृहीतसोमादिसकलं हविस्तवस्यमित्यर्थः नाहिपरकीयधनं

ग्रहीतुं स्वं भवति गृहीतापिस्वामिन एव संसर्पणीयत्वात् अत्र कश्चिदितिहासवचनार्थं निमाण

माह। पार्थेनेतिः हशंकरपार्थेनार्जुनेनांकुजाते कुरुषाशमेनिवेदितमपितत्रेशं हविरूपहारः

तेपार्श्वयोः स्फुटमदृश्यत· तथाच द्रोणपर्वणिवचनं। तं चोपहारं सकलं नेशं ने [illegible] नोकौरमनः। मा

दृशश्येव कोप्याशेवासुदेवे निवेदितमिति। अत्रवासुदेवस्य हविर्निवेदनाधिकरणत्वमी

श्वरस्य संप्रदानत्वमिं [illegible] ज्ञायस्वाहा ग्नये स्वाहेत्याहाविंशादीनां हविः संप्रदानत्वश्रवणाद्वी

हृधताहिदास्य उ आग्निरिदं हविरजुषतइत्याहौ हविसेक्तित्वश्रवणात्तु सएवेतमिंद्रः प्रजया

हास्त्य ३। पश्वालिंगंतर्पयति॥ इत्याद्येफलं अवगम्य कथंसकलहविर्भोक्तृत्वमीश्वरस्येत्यमिति चेत्मैवं॥ नेंद्रादि
शब्दैरिंद्रादयोयज्ञकर्मणिप्रधानत्वेनाऽउच्यंते किंत्वधिष्ठातृमहेश्वरसहिताएवयथादेवतादि
शब्दैर्नशरीरमात्रंनचात्ममात्रं किंतुशरीराधिष्ठात्रात्मानउच्यंते एवमत्राप्यधिष्ठातृमहेश्वरस
हिताएवेंद्रादिशब्दैरुच्यंते तेनतत्राधिष्ठातामहेश्वरएवयतोनेनचक्षुःसत्तानपीन्द्रादीं स्तर्पयति
यत्नकर्तृंश्चस्वर्गादिफलेनसंयोजयति॥ यथामातागर्भपोषणायान्नदेवतेनदेहोदरान्नपा
पशु नादिनास्वयंतृप्तेनतृप्तासतीस्वजठरगतमपत्यमपितर्पयति दोहदान्नपानादेःप्रदातारंच
स्वस्तुपकारफलेनसंयोजयति तद्वत् तथाचकूर्मपुराणं॥ अहंतेसर्वहविषांभोक्ताचैवफ
लप्रदः। सर्वदेवतनुर्भूत्वासर्वात्मासर्वसंस्थितइति॥ तत्रैवनियोगाध्याये हव्यंचहतिदेवा
नांकव्यंकव्याशिनामपि। पाकंचकुरुतेवह्निःसोपिमच्छक्तिबोधितः। गोपयत्येषजगत्कृत्स्नं।
शक्तःसर्वमिरेश्वरः। यज्ञानांफलदोदेवोदेवदेवनियोगतइति॥ ईश्वरस्येंद्रादिसर्वशब्दवाच्य राम
त्वमाश्वलायनेनोक्तं सर्वाणिलोकेतस्यनामधेयानिसर्वाःसेनाःसर्वाश्चपु[illegible]क्रियणा ३९

नि इति॰ अस्यार्थः यावंति किल लोके नामधेयानि अभिधानानि संति तानि सर्वाण्यस्यैव नामधेया
नि यावंतो लोके शब्दाः संति सर्वे एयमेवोच्यत इत्यर्थः लोके यावत्यः सेनाः संति ताः सर्वा अस्यै
व सेनाः नृपस्यात्मलाभस्य सेना सन्ति॰ अनेन राजादय इंद्रादयश्च रुद्रांशभूता इत्युक्तं॰ या
वन्ति लोके उच्छ्रायणानि उत्कृष्टानि ऐश्वर्याणि श्रुतवशया तपस्थितया अन्येन वा तानि सर्वा
ण्यस्यैवांशभूतानि नृपस्यात्कृष्टत्वसंभवः अथवा उच्छ्रायणानि सर्वतो दिव्यानि तेषु यं वस
तीति प्रतिज्ञातं सोमादि हविषामीश्वर शेषत्वमनुपपादयति॰ सोममिति॰ ओषधिबलिष्ठ यम्मा
णां सोमं त्वमिहर्षमनु शुशुमान् श्रुतिः अयं सोमः कपर्दिन इति॰ हे पशुपते पशूनामालंभनं नि
यतं त्वमित्थं [illegible] न श्रुतिः इमं पशुं पशुपते ते अद्य इति गविसृज विद्यमानं॰ पयो दध्याज्य
लक्षणं हविश्चेत्यमनु शुशुमरो इंगवीति॰ तस्मात्कारणात् अध्वरेषु यागेषु इंडेश्वरेणास
हनाकस्मात् इंद्रादीनां विवादः सकलहविषामीश्वरसंबंधोत्पत्तिसिद्धत्वात् तदा तथैव देवानां ह
विर्ग्रहणमस्याह उत्पत्तिं इति॥ हे शिव सोमः पशुः गवि च यानि दुर्वा पयो दधि घृतं तत्
७३

लक्षणानि संति तेन पशुत्वादिजीवन्निवृत्तपाशिमारत्यनेगृहीतसंबंधाः स्वीकृतनवसंबंधाः अतो देवा पशो
गी र्वपादिलक्षणे हविषि लागं ते अनुज्ञया गृह्णंतीति तत्र श्रुतिः इमं पशुं पशुपते ते अद्य बध्नाम्यग्ने सुकृतस्य
ता 31 मध्ये। अनुमन्यस्व सुयजा यजाम जुष्टं देवानामिदमस्तु हव्यमिति। तदितरेषामपि हविःषु महेश्वरसं
बंधाविशेषादीश्वरानुज्ञयैव देवा गृह्णंतीति कल्पनीयं। इमं पशुं पशुपत इति श्रुतावुक्तं तात्पर्यमी
श्वरानुज्ञया लाभ्यं इतरत्रानुज्ञाकल्पना या किं मूलमित्याशंक्य सर्वकर्मस्वीश्वरानुज्ञाया विधाय
कं मंत्रपदमेव दर्शयति कर्मेति। नैपरं पशुबंधनमेकमेव तत्वास्यनुज्ञां लब्ध्वा कर्तव्यमाहुः किंतु सर्वेषु
कर्मसु मुमुक्षासामारंभणे लवत्प्रसवनं लवत्तनुज्ञया कर्तव्यं जपमंत्रविहोमग्रहणं तिशंसंति। सर्वक
र्मसु जपः प्रपद्य इति मंत्रः। सामगैराम्नातं पद्धतेजस इत्युपक्रम्य कर्माधिपतये नमः इत्यं
तं तत्र विरूपाक्षोऽसीति प्रस्तुत्य त्वां प्रपद्ये त्वया प्रसूत इदं करिष्यामि तस्मै मा राध्यतां तस्मा उपपद्य
तामिति। अयं सोमः कपर्दिने इति श्रुत्या सोमस्येश्वरसंबंधउक्तः शिव इत्युक्तं तस्य सोमावस्था
यामपि ईश्वरसंबंधोऽस्तीत्याह संकल्पत इति। ॐ अग्नि षोमे नयत्यस्य इति संकल्पयज्ञं तनुयागहेतुः राम
विनज्याविन कृं कृत्वा वा यस्येयं प्रजापतिमुखा दर्शयंतो ध्ययवो यजुर्वेदविहोकृतवहाचिषि ३२

हूयमानांसोमाकृतिं तच्चात्मगंधवर्णां तिरुद्र आकृतय इतिश्रुत्यासोमस्येश्वरत्वं तादर्थ्यं प्रतिपादनं
तत्सोमस्य रौद्रत्वमिति तात्पर्यः। एवं यज्ञीयानां हविषामीश्वरशेषत्वमुपपाद्य यज्ञावशिष्टस्यापि
शर्वशेषत्वमाह। सर्वमिति। देवताऽतिथिसमाश्रितत्वत्यवर्गैरुपभुक्तावशिष्टं धनं यथा धनपतेः स्वं तथा
यज्ञपरिशिष्टमपि धनं त्वदीयं मंथिग्रहव्यतिकरे मंथिग्रहपूर्वांते यथा श्रुतं तवतान तथा च यजुर्वेद तैत्तिरी
यकांडप्रथमप्रश्नन वमानुवाके श्वेरस्य वाक्यरूपं श्रुतिवाक्यं। मघाविमानि त्यक्त्वा वीर्यान्न तवैतदशि
तदस्य प्रवीघघन्नवास्तो हीयते तत्समैवेलहिति। हीयते विद्यते इत्यर्थः बहुचब्राह्मणोपितथा एषहैवोस्य रुद्र
यदतद्दश्च ममवास्तुहीनमिति। अस्यार्थः तानेव समर्थान्नपश्यन्नलित्वा पश्चैवहैवेद्दश्चं मर्वमिमेवेत्यत्र
वीत्। तत्रोपपत्तिमाह। वास्तु हीनमिति। वास्तोयज्ञस्थानमोहितं विद्यमानं तत्सर्वं ममैवेति। एवं यज्ञियानां
नांसोमादि हविषां यज्ञशिष्टद्रव्यस्यापीश्वरशेषत्वमुपपाद्य सर्वेषाम पियज्ञानामीश्वर एवेश्वर
इत्याह। गव्येनेति। गव्येन पयोदधिघृतलक्षणेन साध्यानामौपासनादीनां पाकयज्ञानां सोमहविषां सोमाख्य
हविषां साध्यानामग्निहोत्रादीनां सप्तसोमयज्ञानां पक्वचरुसाध्यानामाग्नेयादीनां सप्तहविर्यज्ञानां तुन
यो विलजंति। तेषु सर्वेष्वपि त्वयानुस्वामीति शेषः। तथा च श्रुतिः। त्रिःसप्तयज्ञास्तानि त्वदेवतानन्दादिदंनि इत्यपन्नः

हितायाग्नियाम इति। अस्यार्थः। त्रिसप्तएकविंशतिसंख्याकानि रहस्यभूतानि इध्याग्निपदैः पदानिय
33 ज्ञात्वेदं त्वय्येव विज्ञातीयाग्नियास अग्निर्जस्तान्यविद्वन्। आत्मत्वेनेति यमपि विशेषस्तस्या
मध्वरविधौ राजानमामनाम। तत्र श्रुतिः आवोराजानमध्वरस्य रुद्रमिति। अग्नये रुद्रवते पुरो
डाशमष्टाकपालमिति विहितो रुद्रवदग्निदेवताके कर्मणि विहितयोरस्त्वमग्ने रुद्र आवोराजा
नमध्वरस्य रुद्रमिति मंत्रयोर्याज्यापुरोनुवाक्ययोश्च रुद्रोपसर्जनकाग्निप्रकाशकत्वाद्रुद्रस्याऽ क
पकर्षः प्रतीयत इत्यत आह अग्निमिति हे शंकर त्वमग्ने इत्यनुवाक्यामंत्रः तदनंतरो वा आवोरा
जानमिति पुरोनुवाक्यामंत्रः रुद्रवंतं रुद्रविशिष्टमग्निं प्रकाशयन् अग्नये रुद्रवते पुरोडाशमष्टा
कपालमिति विधिवाक्योक्तं रुद्रवंतमग्निं आवदन्नित्यर्थः। तथा हि राजन्वतीत्युक्तिरिति वाक्यमि
व विशेषणात्तु तस्य रुद्रस्य प्रतिकूलमुत्कर्षमपनेतुं अपोहितुं इमौ मंत्रौ नालं न समर्थौ यथा राज
न्वतीत्युक्तिरिति वाक्य विशेषणात् तस्यापि राजतः प्रकर्षं नापनयति तथाग्नौ नीयमानावपि तौ
मंत्रौ तद्विशेषणस्य रुद्रस्य प्रकर्षं नापनयत इत्यर्थः। किं च रौद्रीं रोहिणीमालभेतेति विहितयोः राम
शुभ्यकावनयोरेव मंत्रयोर्याज्यानुवाक्यात्वेन रुद्रप्रकाशकत्वात् रुद्रप्रधानाविमौ मंत्राविभ्याह। ३३

रौद्र

पारोहिणीति । पारोहिणीवर्णतिः प्रभुर्व्याक्रि ह्वयतितस्यामिमो त्वहकेदेवताकौ दृष्टौ तस्मात्का
रणा एव हेकविषयत्वं यत्तपतिलृमिरु कर्माणि धीराः प्रतिजानाति अग्नये रुद्रवत इति अग्नये रुद्रवत
इति वाक्येत्वग्निविशेषणत्वेन निर्देशो रुद्रस्य प्रकर्षमेव गमयतीति सोदाहरणमाह । पित्रेति । पित्रा
कृतविशेषणं कुमारमिव ईश्वरेणास्वामिनाकृतविशेषणं त्वमिव गुरुणाकृतविशेषणं शिष्य
मिव गुणाधिकेन त्वयाकृतविशेषणमग्निं कश्चिदांसाविमौ मंत्रोपरमंत्र प्रकर्षं गमयतः ज्ञापयतः
निर्देशाज्ज्ञानमनुपसर्जनित्वेवस्त्रुगतं प्राधान्यं नोपरुध्यतीति भावः । ईश्वरस्याध्वरराजत्वप्रतिपादके
नरुद्रसूक्तव तिनिगाथपतिमिति मंत्रांतरेणा अवगाहा वोराजानमिति मंत्र ईश्वरगोचर एवे
त्याह । सहितेति । गाथपतिं मेधपतिमित्येषाम् कृतं मेधपतिं वदति अयमावोराजानमिति
मंत्रोलवंतमध्वरविधेराजानमाह । अध्वरराजत्वप्रतिपादकत्वादयमावोराजानमिति मंत्रस्याग्नि
देवताकत्वं अनीयत इति अत आह । त्वदिति । त्वदस्सूक्ति मंत्रगणामंडनमो लिरत्नं मंत्रोपिगाथप
तिं मेधपतिमिति मंत्रवद्रौद्र एवेति भावः । नत्वावोद्याद्दशवाम देवाश्चिद्गुणाग्निरिति शौनकवचना
दावोराजानं [illegible] रुद्रसूक्त मंत्रसमूहात्स्वंकारशिरोमणिः शौनकादिभिः पठितो

34
यद्यघ्रुलिरिमारुद्रायेतिस्रुक्रांतेपठितइतिभावः स्वरूपपर्यालोचनया। पित्वामेवप्रकाशयती
त्याह। रूपेणस्येति। रूपेणस्वरूपपर्यालोचनया। त्वदभिधानगृहीतशक्तित्वात्त्वदभिधानस्वीकृ
तसामर्थ्यः यावन्नायातिमरणंयावन्नाक्रमतेजरा। यावन्नेन्द्रियवैकल्यंतावत्पूजयशंकर
मितिशिवधर्मवचनमूलत्वादपिरौद्रएवायंमंत्रइत्याह त्वत्कमिति। हेपरमकारुणिक। आ
वरस्यपरमेमंत्रः स्तनयित्नुकल्याःमेघसदृशाइत्यवगच्छत। तावादित्यर्थः मरणानोमरणात्पुरा
पूर्वल्लिहीयं आकारगामाक्रान्तमितियावत्। ब्रुवाणोयावदुपक्रमायावादच्छन्दवसाः शिवधर्मस्थि
केयविद्यायालिङ्गितिवचनस्यमूलं। मंत्रश्चयजुःसंहिताप्रथमकांडतृतीयप्रश्नचतुर्दशानुवाकेस
माम्नायते। आवोराजानमध्वरस्यरुद्रंहोतारंसत्ययजंरोदस्योः। अग्निंपुरातनुमिति। अस्यार्थः अ
ध्वरस्यरोदस्योर्द्यावापृथिव्योश्चराजानंहोतारंधातारंसत्ययजंअमोघाराधनंअग्निंमूर्तिमास्थि
तंरुद्रमीश्वरंतनयित्नोस्तकारलोपश्छांदसः स्तनयित्नुसदृशादचित्तात्पुरामेघुःआकं
अवसेरक्षणायआकृणुध्वंआकृयत। परिचरतेत्यर्थः। एवंद्वादशभिःश्लोकैःक्रतुशोभितलक्षणं। उक्त्वा राम
वायः श्रुतीरन्याविचारयतिनत्वराः। नीमोसीति। हेशंकरउज्वलितस्त्वमसिहस्तकल्पेःउपलक्ष्यसिह ३४
नयित्नोरचित्ताद्धिरण्यरूपमवसेकृणुध्वं ५

कासदृशौ स्तेजोसित्वं मोसि विस्पृत्य स्मादिति सोमः तत्र श्रुतिलिंगं स्वनिनाहं मृगमिति मृगं न त्वां मामि
ति श्रुतिलिंगवाक्यं ते त्वां मत्वेनानि दर्शनं स्तुहि श्रुतं गर्तसदं युवानं मृगं न त्वां मममिति वेदांतेऽप्यु
सिरुद्रं गर्तसदं गर्ते हृत्पुंडरीकाख्येऽवस्थितं युवानं मृगं न सिंहमिव त्वां मम उपहत्नुमुग्रमुपहंतारं पा
पानामुग्रमनतिलंघनीयं महाशिवं हे अंतरात्मन् स्तुहीति तस्यार्थः त्वं चासौ सौम्यस्यापि हे यस्य
तेजः प्रकर्षादिव त्वां मत्वामितित्वावः तत्र दृष्टांतमाह। अक्रोधन इति अक्रोधशीलः क्रुधमंडार्थेभ्यश्चे
तिताच्छील्ये युच्। स्मितं मंदहासान्वितं मुखं यस्येति स्मितमुखोपि निजानुलोचनादस्तकीयते
जः प्रकर्षाच्चित्प्रतिराजा तत्तुल्कटां जनानामाभातितोलयायत्वबति तेजः प्रकर्षाद्दिवाशस्य त्वां मत्वा
युपमादृयत्नू ब्रह्मत्वात्स्वात्मा विक्रमापि त्वां मत्वमत्वोत्याह भजस्व घनमिति हे गिरिश त्वामस्तुघ
नं घनं कुलिशमधीमहे महद्भयं वज्रमुद्यतं यस्त्वाद्धि दुरस्थतास्नेत्ववंतीति पवनस्त्वानुहूतशातुश
कावानु सूर्याग्निरिंद्राः स्वस्वकाविस्पृतीति शोचः मृत्युश्च तदधिकारस्तत्स्तदाश्रयत्वं। तस्यार्थास्तस्तदधि
कारस्ततोन्येपि देवास्तु बिभ्यतीति यतः अयं हेतुत्वात् लयहेतुत्वं ब्रह्मत्वलक्षणं ब्रह्मणोऽसा
धारणो धर्मः तथाच कठवल्लीश्रुतिः भयादस्याग्निस्तपति भयात्तपति सूर्यः भयादिंद्रश्च वा

35 श्चश्चमृत्युर्द्धावतिपंचमइति॰ वायुराग्निश्चचवसीभीषास्माद्वातःपवते भीषोदेतिसूर्यः॰ भीषास्मादग्निश्चें
द्रश्चमृत्युर्धावतिपंचमइति॰ एकमेवाद्वितीयंब्रह्म॰ एकएवरुद्रोनद्वितीयायतस्थे एकोरुद्रउच्यत
इतिपरस्परसमानार्थाभ्यांद्वाभ्यांश्रुतिभ्यांगतिसामान्यन्यायेनपर्यायत्वमध्यवसीयते॰ रुद्रोवा
एषयदग्निस्तस्यैतेतनुवौघोरान्याशिवान्येतिश्रुतिसिद्धयोरीश्वरतन्वोःकायमाह घोरेति॥८५॥
भगवतोरुद्रस्यसशाद्व्यालंकितुग्रहार्थंबहवस्तानवःसंतितासुमुमुक्षुणिनांभगवदनुग्रहवशात्
शांतरूपाआयांतिदुष्कृतिनांतुताएवघोराआयांतिति॰ हेभगवन्घोराअघोररूपाशिवाशांता
चेत्येवंमुलयातनुः तन्यतेजगदनयेतितनुःशरीरंआस्ति तयाघोराउपास्यमानाममबाधक
यकर्मविषयाणिस्तोत्रप्रणामैराराध्यमानानिवारंसंसाररोगिणांभिषजपतिचिकित्सेति॰ अ
न्याशिवातनुर्भिषग्जनकृतांसंसाररोगिणांतदुन्नयनाशोपायभूतकमन्तिष्ठानजेतुहूत मदुः
त्राद्देवा जन्मदुःखमरणसमारगासतीदृष्टण्दशनिमा... शिवा... पिशिवतांमंगलत्वं... नामीश्वरतांआज्ञा
पादयति॰ यद्वतरुद्रियंजुहोतिमेवास्यघोरातनुरस्ति॰ अस्यां तेन शमयति॰ यद्भसोद्धीरांजु राम
होतिति॰ वाजश्चमेप्रसवश्चमेप्रयतिश्चमेप्रसितिश्चमेधीतिश्चमेस्वरश्चमे॰ सुवश्चमे ३५
तियेदास्यशांतातनुस्त्वांतेनप्रीणातीतिश्रुतेरभिप्रायमाह ... घोरामिति। यद्यस्मात्कारणात्तवहोमस्यउत्तये
पिमंत्राः रुद्रानुवाकचमकानुवाकरूपास्तेषां

इत्येते ईशान्निमंत्रैरेकामाकुतिं कृत्वाऽविद्धेनेनाऽऽरण्यश्रमेपानश्रमइत्यादि निर्दिशति शान्तिमंत्रै
त रेकैकाकृतिर्हूयते साधस्तोद्वारितत्र श्रुतिः सुतं वसोर्धारां जुहोतीति नमस्तोरुद्र मन्यव इत्यादि
मंत्रैर्नमोनमस्कारं विदधतः कुर्वतो घोरां तनुं शमयन्ति शान्तां कुर्वन्ति आशा रोगिणां ओषध
प्रदानेनशीघ्रं रोगनिवर्तकं किं चिकित्सितारं चिकित्सकं तु पथ्यं निचमकान्तु वा केवाजिश्रमइत्या
दिभिः शिवां तनुं प्रणामंति चमकान्तु वाकानामीश्वरप्रतिपादकत्वे परिशेषः प्रमाणमि-
त्याह विच्छिन्नेति विष्णुप्रजापतिपुरंदरसर्वकं त्रु देवत्वेऽपि वाजादितुल्यमन्वादितुल्य
माशंसितेकुर्वन्तु श्रमइत्यादि निराकान्तिते तुच्चमकावाचश्रमइत्यादयो मंत्राः परिशिष्यमाणाः
अशङ्कितातारस्मात्कुः वाजाद्याशास्यकोन वनु कृत्वात् शङ्कितविनापि वाजादिहितत्वेनेश्वरः प
रिशिष्यत इति लावः परिषिंचति रुद्रस्यां तां हिस्या इति श्रुतेस्तात्पर्यमाह मुख्यमिति हे महेश्वर म
अप: हतां सन्निधौ मर्त्यमात्रमिव अल्पपुरुषमिव ते सन्निधौ देवतान्तराणि मानयितुं प्रजयितुं
नयुक्तं तस्मात् कारणात् त्वद्वचनविधौ अत्र तस्मिंपेक्षमाणाः त्वत्कमसि तस्मिन् त्वदाराधनसामा
ग्रौ परिषेचनं रूढ्यं तदतोऽलमित्यादिनिर्देशेकपरिषेचनमाचरन्ति कुर्वन्ति सर्वैर्वा वरं हृतशौ हृणी षेति
इति

परतमेवपरमहृग्रीतः पशूनामाधिपत्यं तदस्मै तत्पशूनामधिपतिनामेति अहमेव पशूनामाधिप
36 तिरस्मीति तस्माद्रुद्रः पशूनामधिपतिरित्यादीश्वरपाशुपत्यपरा प्रतिपादिका श्रुतिर्निर्वचन
य मर्थश्रुत्यैनव हि तत्वं वेक्तुं जीवानां पशुत्वमीश्वरस्य पतित्वं स्वाभाविकमित्याह। आत्मांतराणी
ति। आत्मांतराणि ईश्वरादन्ये जीवाः परतंत्रत्वादबाध्यत्वात्पशवः पशुवदज्ञाः हे ईश्वर पशुपते
स्त्वातं त्वमतः त्वं पतिरेषां पशूनां पालकः तत्र प्रमाणमाह आत्मानमिति औपनिषदाउपानि
षदमधीयाना आत्मानं जीवमनीशं परतंत्रं भवं तमीशं वदंति उभयोर्जीवेश्वरयोरुभयमनी
शत्वमीशत्वं च स्वभावः। न हीश्वरस्येश्वरत्वे जीवानामनीशत्वे स्वभावादन्यत्कारणमस्ति किंचि
न्निमित्तमस्ति ईश्वरस्य पशुपतित्वे पशुपतये नम इत्याद्याः श्रुतयः प्रमाणं पुराणं च ब्रह्मविष्णु
सुरेंद्राद्याः पशवः परिकीर्तिताः। तेषां पतित्वाद्देवेशः शिवः पशुपतिः स्मृत इति स्वतः सिद्धं पतित्वं
मे युष्माकं पशुता चिरेत्यागमे ननु यदीश्वरस्य पाशुपत्यं स्वाभाविकं सर्वेषां वरं ब्रह्मा इति अ
हमेव पशूनामिति ईश्वरस्य पाशुपत्यवरणप्रतिपादिकाः श्रुतयः कथमुपपद्येरन्नित्यत आह राम
मेघामहइति। हे वरेण्य शंकर पाशुपत्ये संप्राप्तमेव सति नित्यसिद्ध एव सति हृषेलोचितंव ३६

रणांकस्मैप्रयोजनायविद्यमानस्यैपांशुपत्यस्यवरणेनप्रयोजनंनदृश्यतइत्यर्थः।विरणप्रतिपा
दिकानांश्रुतीनामर्थवादत्वान्नवरणेनान्वयमित्याह विध्यर्थमिति।अध्ययनचोदनयातस्मात्स्वा
ध्यायोध्येतव्यइत्यध्ययनविधिनागृहीताअर्थवादाःसिध्यर्थंविधेयेपुरुषप्रवृत्त्यर्थंविधिंदिवत्स्व
विद्यमानमेवार्थंजल्पंति।एतदुक्तंभवति विधिवाक्यंतावत्पुरुषंप्रेरयितुंविधेयार्थस्यप्राशस्त्य
मपेक्षतेअर्थवादवाक्यंचविधिवदर्थविबोधपर्यवसितार्थनायाविधिपरिगृहीतत्वेनपुरुषार्थ
मपेक्षतेतत्रपुरुषार्थपर्यवसितंविध्यपेक्षितंप्राशस्त्यंलक्षणयासमर्पयदर्थवादवाक्यंविधि
वाक्येनसहैकवाक्यतामापद्यतेनतुस्वतःकंचिदर्थविधत्तेबोधयतिवा।अतोनार्थवादःप्रमा
णं।यद्यपिप्रमाणांतरविरोधाभावेवैयासिकमतेर्थवादप्रमितोर्थोंगीक्रियतेतथाप्यत्र
पशुपतयेनमइतिनित्यसिद्धपाशुपत्यप्रतिपादकश्रुत्यंतरविरोधान्नहिरणप्रत्याख्यानांनस्वा
र्थपरत्वेति।ईश्वरस्यपाशुपत्यवरणान्नावंप्रकारांतरे णप्रतिपादयति।नानेति।त्वेत्याद्युपाल्य
